ॐ

नानार्थौषधिकोशः

पत्राणि १०१

3.98


शिव कोश व्याख्या

A- शिवदत्तः

F. 101

पूर्ण कोशः





पुस्तकमिदं रामचंद्रपाठस्य प: १०१

८...

नं. ३१८ घ
शिवकोश शब्दरत्न
शिवप्रकाश:
१०१ Folio
को. शि.
कर्ता -
शिवद.
लिपिकाल: १८८० वि

शिवप्र० ॥श्रीगणेशायनमः॥ ॥मदकलितकपोलमञ्जुगुञ्जन्मधुकरमिश्रकलादन्तकर्णतालः॥र
दवलयितविघ्नवल्लमुल्लः कलयतुमङ्गलमङ्गजोभवान्याः॥१॥सजयतिदेवः सोमः शि
१ रसाप्रविभर्त्तियं शिवः सोमः॥ अनवरतविपुलसुधाविरन्ध्रैः रेरवति यो वसुधाम्॥२॥विविध
वाग्यटग्रन्थानटीकाः कोषांश्च भूरिशः॥शिवदत्तः स्वकोषस्य आरम्भमारब्धुमीहते॥३॥प्रा

॥श्रीगणेशायनमः॥ ॥वन्दामहे भारति तं भवत्याः कृपाकटाक्षं करुणाप
रायाः॥यतोजगद्व्यस्तसमस्तवस्तु स्वहस्तविन्यस्तमिवावभाति॥१॥ ॥

रिप्सितग्रंथनिर्विघ्नपरिसमाप्तये कृतं मंगलं शिष्यशिक्षार्थमुपनिबध्नाति॥ वन्दामहे इति॰ हे
भारति करुणापरायाः भवत्याः तं कृपाकटाक्षं वयं वंदामहे। तं कं॰ यतः यस्मात् व्यस्तसमस्तवस्तु रामः
जगत्स्वहस्तविन्यस्तमिव आभाति। अत्र स्वहस्तेन स्वहस्ते वा विन्यस्तमिति तत्पुरुषः। अत्र च १
ग्रंथकर्तुर्भारतीविषया प्रीतिरभिव्यज्यते इति भावध्वनिः। तदुक्तं॥ रतिर्देवादिविषया व्यभिचा
रीतथांजितः॥ भावः प्रोक्त इति॥१॥

ग्रहस्य प्रयोजनमभिधेयमाह ॥ शाश्वतेत्यादि॰ विविधानि यानि औषधनामानि॰ तत्र संदिहान स्य भिषजः प्रीत्यै संदेहनिवृत्त्यै शाश्वतादीन् कोषान् विविच्य शाश्वतादिकोषानालोक्य ज्ञात्वा॰

॥ शाश्वतं वाजयामरवोपालितसिंहमेदिनीविश्वान् ॥ हारावलीहला युधशाश्वतहेमचन्द्रिकाः एतु शेषांश्च ॥ प्रीत्यै विविच्य विषजो विविधौषध नामसंदिहानस्य ॥ नानार्थौषधकोषो विरच्यते लिङ्गभेदेन ॥ ३ ॥ त्रिषि तिपदं त्रिलिङ्गां मिथुने तु पदं द्वयोरिदं वोध्यं ॥ शेषे निषिद्धलिङ्गं त्वं ता थादीन पूर्वकं भजतः ॥ ४ ॥ ॥

((लिंगभेदेन सह नानार्थौषधकोषः विरच्यते कोषः संग्रहः ॥ ३ ॥ उपोद्घातसंगत्याह ॥ त्रिष्विति॰ निषिद्धलिंगमिति निषिधात् लिंगात्तरशे षलिंगे वोधनीयत्वेनोद्दृश्ये सति लिंगनिषेधोत्र वोध्य इति निष्कृष्टार्थः ॥ त्वंतेति॰ त्वं तं अथा दिचनपूर्वं भजतः । स्वयं कन ॥ ४ ॥ रामचंद्रः ॥

शिवप्र॰ नानार्थेत्यादि॰ स्पष्टम्॥५॥ प्रागिति॰ पूर्वेणान्वयशंकानिरासार्थमेतत्॥ द्वयोः द्वंद्वेन एकता एकप
दत्वं च न कृतं॥ एकार्थत्वशंकानिरासाय॥ द्वयोरित्युक्तेर्वक्तृणां द्वंद्वेपि न क्षतिः॥ शाद्वावृत्तिरिति॥
२ लिंगैक्ये शब्दावृत्तिर्न कृता॥ सकृदुपात्तस्यैवेतरान्वययोग्यत्वात्॥ सप्तमीति॰ न विशेषणे इति॰

नानार्थः प्रथमान्तोत्र सर्वत्रादौ प्रकीर्त्तितः॥ सप्तम्यन्ताभिधेयेषु वर्त्तमानः सु
निश्चितः॥५॥ प्राङ्नानार्थान्न तल्लिङ्गं द्वयोर्द्वंद्वे न चैकता॥ शब्दावृत्तिर्न लि
ङ्गैक्ये सप्तमी न विशेषणे॥६॥ लिङ्गं रूपादपि व्यक्तं लिपिभ्रान्तिच्छिदे क्व
चित्॥ स्त्रियां नपुंसके पुंसीत्याद्यैः पुनरिहोच्यते॥७॥ ॥श्रीरामः॥

स्वतन्त्रार्थत्वभ्रमनिरासायेति भावः॥६॥ लिङ्गमिति॰ रूपात् पुंस्त्वाद्यभिव्यंजकशब्दसन्नि रामः
वेशविशेषात् प्रकटमपि लिंगं लिपिभेदकृतभ्रांतिनिवारणाय स्त्रियामित्यादिशब्दैः पुन २
रिहोच्यते॰ वक्ष्यते॥ वर्त्तमानसामीप्ये इति भविष्यति लट्॥७॥ ॥श्रीरामः॥ ॥

एकेति० स्वराश्च कादयश्च ते च ते काद्यन्ताश्च तादृशशब्दानां ये वर्णाः समुदायास्तैः नानार्थसंग्रहः एकद्वित्रि
चतुःपंचषट् वर्णानुक्रमात् कृतः ॥ ८ ॥ के कः ॥ क इति० चित्रको वह्निसंज्ञकः । वह्निपर्यायनामकः इत्यर्थः ।
चित्रको गुल्मकः सायं पत्रयत्रश्चित्रसुमैः ॥ सितपीतारुणैः श्यामैः पुष्पैरेव गुणोत्तर इति ॥ सर्पो हर्कः ॥
श्वेतो वृकः क्षेत्रेषु सिद्धकः ॥ त्वलकः का ... भेदः श्वेतार्कयोः सुमैः ॥ सुगंधिपुष्पश्चान्योर्क इति वा
लकं ह्रीवेरं ॥ वालकं वारितोयं च ह्रीवेरं जलनामकमिति ॥ सिद्धो वा मुरवालकावितिं ॥ को ब्रह्मानिल

॥ एकद्वित्रिचतुःपंचषड्वर्णानुक्रमात्कृतः ॥ स्वरकाद्यादिकाद्यान्तवर्गैर्नानार्थसंग्रह
ः ॥ के कः ॥ कश्चित्रके च सूर्यार्के वालके तु नपुंसकं । कद्धि ॥ काकास्यात्काकजङ्घायां काकोली
काकनासयोः ॥ काष्ठोदुंबरिका काकमाचिका रक्तिकास्वपि ॥ ॥

मीरात्मयमदक्षेषु भास्करे । मयूरे ग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कमिति मेदिनी ॥ कद्धि ॥ काके
ति० काकजंघा सुलोमशा । काकजंघा नदीकान्ता काकतिक्ता सुलोमशा ॥ पारावतपदी दासी काकसो
कतु सा मसीति ॥ का काली वीरा ॥ अथ काकोलिका नूयेरचि पत्रयपयान्विता ॥ कंदिमकाष्ठा मधुरा भाव
क्षीरक्षीरिणी स्थिरा । कंदिममधुरा पूर्वा गुल्मको न्या यथादितेति ॥ भावमिश्रस्तु० यथा स्यात्क्षीरकाकोली
काकोल्यपि तथा भवेत् ॥ एषां केचिद्वेल्लस्याभेदो यमुभयार पीति ॥ काकनासा चोरस्नायुः । काका
स्यसस्या काकांगी चोरस्नायुः शिरावला । काकनासा च लोके तु कोवा हठीति विश्रुता ॥ काष्ठोदुं

शिवम० टङ्क इति० टंकनो धातुस्रावी। क्षारः स्वाभाविको भूस्थो मरु चंडी शाके च यमिति॥ नीलकपित्थो मन्म
३ थावासः॥ आम्रातकभेदः॥ तथा च राजनिघंटुः॥ अन्यो महाराज चूतो महाराजाम्रकस्तथा॥ स्थूलाम्रो
मन्मथावासस्संको नीलकपित्थक इति॥ अमरमालायां कपित्थः पवर्गतृतीयमध्योपि। आम्रातः पारेयो
विंवयवोदरफलोम्लकः॥ जंबीरकरलोंऽ वाडा नाम ख्यातो हिमालय इति॥ अथ त्रिक इति० क्षुरो गो
3 क्षुरः॥ गोक्षुरुर्गोक्षुरः क्षुर इति केयदेवः॥ त्रिकंटस्त्रिकटस्त्रिक इति च॥ एकस्त्रिकंटसमूलकः पंक्ति
पत्रः प्रसिद्धकः॥ वह्निका पीतकुसुमा भूमिगान्यो महानथ॥ दृग्नारिपत्रो विटपस्तत्सछा

॥टङ्कोस्त्रीटङ्कलो नीलकपित्थे थत्रिकङ्क्षुरे॥ शृङ्गाटके च ल्लीवं तु त्रिफलादित्रिकत्रये।

यस मिस्तुमः हृत्तं फलं चतुष्कं कंटमयमाभ्यां गुलोत्तरः। शार्ङ्गधरमरिमेहे च कृच्छ्रे न्यासुतदाह्नि
षु॥ रसायनप्रयोगे च महानेव गुलोत्तर इति॥ शृंगाटकः प्रसिद्धः॥ शृंगाटवं स्थगाधाम्बु
स्थासारिघनपत्रिणी॥ फलं शृंगाटकं सिद्धं द्विकंटयनवल्कलमिति॥ त्रिकत्रयं० विभीतकाम
लकहरीतक्य एकं॥ शुंठी मरिचपिप्पल्यो द्वितीयम्॥ त्वक्पत्रैलं चेति तृतीयम्॥ ॥ २

वकोवुकइति॰ वंगसेनोगस्तिः॥सितपीतनीललोहितकुसुमविशेषाच्चतुर्विधोगस्तिरितिराजनिघं
टुः॥सिंहगस्तिः पंक्तिपत्रोमदुः शंबीमहीरुहः॥अगस्त्यस्पोरयंयावत्सपुष्पःसतुरक्तपत्रइति॥ए
रंडःपंचांगुलः॥सिंहएरंडकोविश्वकुरक्तपीतसितासिताः।तेनेकेकुसुमेस्सस्येमृदुकंटेस्त्रिबीजिभिः॥
पर्ययन्तुरंनैरोकच्छैतःश्वभ्रसमिघृतमिति॥चमूरकार्कः॥शिवमरद्रीयाध्रुयतएकाष्ठीलोवकोच
सुरिसमरः॥वृकश्चि।वसुकोवृकद्रुतिद्विनामवर्गेहृदयदीपकः॥शाकइति॰हरितोमूल।कादिशि

॥वकोवुकोवकुसेनेरसैरएंडवसावपि॥शाको स्त्रीहरितेनातुरे॰॰कायांचरवरछदे॥

मुः॥मूलपत्रकरीराग्रफलकांडाधिरूढकं॥त्वक्पुष्पंकवकंचैवशाकंदशविधंस्मृतमिति॥
मूलंमूलकादेः॥पत्रंनिंबादेः॥करीरंवंशांकुरं॥अग्रंवेत्रादेः॥फलंकूष्मांडादेः॥कांडंडसस्त्रादीनां
नाडी॥अधिरूढंतालवीजांकुरास्थिमज्जा॥त्वक्मातुलुंगादेः॥पुष्पंतितिडीकोविदारादेः॥कवकं
छत्रिका॥देशकाक्षिपीलुकः॥रोमवोरंयको देशकाशाकः शालोक्षिपीलुकइतिनिघंटुः॥वका
द्रुनिरितिलोके॥खरछदोभूमीसहः॥सचरवरमसरणपत्रइछो॥दरइतिद्रच्छलः॥विस्तीर्णख
रपत्रोच्चःशाकःप्रायःसंभूभ्रतीति।सागोनइतिलोकेख्यातः॥ ॥ श्रीरामचंद्रायनमः

शिवप्र० शुकइति॰ शिरीषोमृदुपुष्पः॥ शिरीषोमृदुपुष्पश्च भंडीरः शंखिनीफलः॥ कपीतनः शुकतरुः
४ श्यामवर्णः शुकप्रियइतिधन्वंतरिः॥ शिरीषतरुरानीलपंक्तिपत्रोस्यशंवकः॥ तच्चायतावि
स्तृताश्चबीजंवबूलवद्दृढमिति॥ स्थौणेयः शुकछदः॥ स्थौणेयकं बर्हिचूडं शुकवर्णं शुकच्छ
दमितिनिघंटुः॥ वह्नौस्थौणेयकोसितं॥ पुष्पंफलंसविंवंचसुगंधंमानिसर्वशाइति॥ चिं
5

॥शुकः शिरीषस्थौणेयटिण्टुपूगेतुनद्ध्योः॥

टरस्नुः॥ भल्लूकश्चिंदुकोरस्नुरितिकैयदेवः॥ निंवादभ्रदलोविषघ्नद्वनूकः पंक्तिपत्रकः॥ प्र
सिद्धोभंगुरोसारो रस्नुकोदेशभाषयेति॥ टिंटुकः पादयोदभ्रतिंदुकाभदलोगिरौप्रसिद्धोफल
पुष्पोणुरितिभेदमहत्यपि॥ रसादिसाम्यात्तिबुधैरभेदः परिकल्पितइति॥ पूगः क्रमुकः॥ त्वगाध्व ४
जः पूगवृक्षोनिःशाखोबहुपर्वकः॥ फलंसवल्कं उष्णाभंतच्छिपश्चाच्छिवल्कलमिति॥ ॥ ॥

स्पृक्कापृक्केइति॰ माल्यवती मोहना। मुनिर्माल्यवती माला मोहना कुटिलालतेति वाचस्पतिः। स्पृक्का
वल्ली स्थिरा तिक्ता सुगंधिः कोलसंफला॥ अरिपत्रा दाक्षिणात्या किंद्रुत्नोकेतुपानरी॥ लज्जा अंजलि
कारिका॥ रक्तपादा शमीपत्रा समंगांजलिकारिका॥ नमस्कारी गंधकारी स्पृक्का खदिरिका रक्तेति निघं
टुः॥ श्रुखे सरसिरक्तांक्रिस्त्वणकारुणपत्रिका। प्रसिद्धा स्यात्सिताम्भोदलाभिभय स्वसेति॥ कत्रि॰॥

॥स्पृक्कापृक्के माल्यवत्यां लज्जायां च स्त्रियां शुभे। कत्रि॰॥ अशो
को वञ्जुले मानद्रुमे शोकं तु पारदे। अशोका कटुरोहिण्याम्॥

अशोक इति॰ वंजुलः कंकेल्लिः॥ अशोके कंकेल्लिवंजुलाविति हेमः॥ अशोकपादपो वृत्तोऽम्ररिप
त्रोमरद्रुः पृथुः॥ भशारूलं सुगंधस्य पुष्पं वाढं स्थिरं कटु। फलं कषायमधुरं सुगमं चैकं पलार्द्धकमिति
॥मानद्रुमः शाल्मली॥ असारः शाल्मलिः कुटोद्भिधा स्थूलाः तुकंटकैः। पंचवर्ष्टवटिपर्णा स्त्रवाढ स्थू
लसुमः फलं॥ सतूलं फल्गु चैतस्य रसो मोचरसाभिधइति॥ पारदो रसेंद्रः॥ पारदस्त्वफलः श्वेतस्तरस्वी
द्रुतरूप्यवत्। स्वर्णलिये विधेये यो न तत्र विकृतिं भजेदिति॥ कटुरोहिणी मत्स्यपित्ता॥ रोहिणी शकुमठ
दे। सितारुणसुमे साश्मजो गले का छकंदिके इति॥ ॥

शिवम० ५

अम्लक इति॰ अम्लवेतसो रसाम्लः॥ रसाम्लश्चाम्लविदुज्ञो वेतसाम्लोऽम्लवेतस इति हृदयदी
पकः॥ तुंगद्रवं च जंबीरं नारंगं लकुचं तथा॥ वृक्षाम्लं तोपपत्राम्लदीर्घकं टंकपादयाः॥ अत्यं
तरामिथो संज्ञाह्वनेषां कंटके सराद्वति॥ चिंचातिन्त्रिडीका॥ तिंतिडी त्वम्लिका चिंचा तिन्त्रिडी काव
पिप्रियेति वाचस्पतिः चिंचा तररर्वक्र फलः पंक्ति सूक्ष्मछदस्तथेति॥ अम्लिका कंदः॥ अम्लिका

5

॥अम्लको नाम्लवेतसे॥ स्त्री तु चिञ्चाम्लिका चन्द्र चाङ्गेरी तिन्त्रिडी पुंव॥

स्वल्पविटपा सुकुमारा ऽम्लनालिका॥ प्रायेण कामरूपादौ तत्कंदस्त्वार्शसे हित इति वाप्यचंद्रः॥
चांगेरी अम्लपत्रा॥ लोणा लोणा चतुः पर्णी सैव दंतशठाम्लिका। चांगेरी चुक्रिका चाम्ला सुनि
षण्णक पत्रिके तिनि घंटु॥ तिंतिडी वृक्षाम्लं॥ अथ पादयः॥ तिंतिडीकः फलं तस्य चिंचा ईं
दाडिमी दलः॥ दलं कषायमम्लं च फलं तद्रसपोषकं॥ फलानि चास्य भुक्तानि तिंतिडीकसु ५
दाहृतं उदीचांतसिद्धतरंभुवंमंगस्यका

आढकीति॰ शिंबिधान्यभिदन्त्रतुवरी॥ मृदुभिद्धकास्ती॰॥ आढकीतुवरीकाक्षी सुजाताहेमशोधि नीतिकैयदेवः॥ सोराष्ट्रीभूमिजः पांसुक्षारस्ति॥ आर्द्रकमिति॰ शृंगवेरं कटुभद्रं॥ आर्द्रकं शृंग वेरंच कटुभद्रं प्रदीपने मित्यशोकमल्लः॥ प्रसिद्धमार्द्रकं॰ शुष्कं नागरं॰ प्रोग्न वश्षभमिति॥ वि तुन्नकमस्त्रका॥ धनिकाधानिकाधान्यंधानीधानावितुन्नकं॥ धानेयंधान्यकाछत्राहलघागं

॥ आढकीतुस्मृता शिम्बिधान्यभेदेचमद्भिदि॥ आर्द्रकं शृंगवेरेस्यात आर्द्र कातुवितुन्नके॥ इक्ष्वाकुः कटुतुंबीस्त्रीमुञ्जेराजादनेपुमान्॥ ॥ ॥

धाचवेषणा॥ आर्द्रकाद्रकाचेतिनिघंटुः॥ आर्द्रकाद्रकमुलिनापसुत्तमांसादिगार्द्रेणी तिवाग्भटः॥ इक्ष्वाकुरिति॰ कटुतुंबीतिक्तरसातुंबी॥ लंबेक्ष्वाकुस्तुयालावुर्दुग्धिनीकाचदु ग्धिकेतिहृदयदीपकः॥ तिक्ततुंबीतुवक्ष्मेवसिद्धास्वादुस्मृतद्धिधेति॥ मुंजः शरत्वकू॰ ब्रह्मम खलाभिधानः प्रसिद्धः॥ राजादनोदृढस्कंधः॥ राजारनतरुः क्षीरीबालविंवफलंमधु॰ पक्वं पीतंकृष्णवीजंविशेषाद्धानरप्रियमिति॥ राजातनमितिच॥ ॥ ॥ ॥ ॥ ॥

कनकइति॰ चंपकः गंधफली॥ अथ चंपकः॰ पादयोगौरचूताभहृद्गन्धदुफलः सुमं॥ पीतारुणं
द्विधावाढमिति॥ धूर्त्तोधुस्तूरः॥ धत्तूराः सितमध्यास्तुसितपीतारुणस्सुमैः॥ सिद्धाः पाकस्फुट
त्त्रैः फलैरवकुंटकैरिति॥ कालीयकं पीतकाष्ठं चंदनात्पर्कमध्यगं॥ सर्वेद्रुमाश्चंपका
भपत्रास्तेषु द्वयं पुनः॥ पक्वं गौररक्तसंज्ञश्च ज्ञेयं रोहीतकच्छदं॥ मुख्यं त्रिचंदनं तद्धि फलपुष्पवि
वर्जितमिति॥ नागकेसः करिकेसरः॥ अथ केसरः॥ प्रतानीयादयः स्वल्पार्द्धांगुलीछदनः

कनकश्चम्पके धूर्त्ते कालीयेनागकेसरे॥ किंशुके काञ्चनारे च

सुमैः॥ पीतकैश्च सुगंधिः स्यात्सारत्वकू पत्रकेसरैः॥ तस्यत्वकू चोचं॰ तजइतिलोके। पत्रा
लितमालः॥ केसरोनागकेसरः सारस्त्वनुपयोगित्वान्नोक्तः॥ किंशुकः पलाशः॥ पलाशपा
दपः सिद्धस्त्रिदलः शितिरक्तयं॥ कृष्णश्वेत तुल्यरक्तपुष्पः शंचाशिरीषवदिति। कांचनारः
कोविदारः॥ अश्मंतःपादपः शंबीसुगमपत्रोणुपुष्पकः॥ कषायमधुरोनूपे॰ कोविदारोपि
तादृशः॥ किंचिन्महान्महारक्तपुष्पः शंबीकषायकइति॥ ॥

क्रमुक इति॰ ब्रह्मदारुणं तूदं ॥ तूदं तूलं ब्रह्मनिष्ठं क्रमुकं ब्रह्मकाष्ठकमिति केयदेवः ॥ तूदो महीरु
हः सारिसा ग्रपत्रः प्रसिद्धकः ॥ सिंदूरीसदलो बीजां गुली सफलो मधुरिति ॥ तांबूलं नागवल्लीदलं
॥ तांबूलवल्ली सिद्धैव सौराष्ट्रमगधादिषु ॥ किंचिदुन्नतभूभागविपुंलोटजमध्यजा ॥ स्थिरोद्धुगा
मत्तनुकाफलपुष्पविवर्जितेति । क्रमुकोभद्रमुस्तोपीतित्रिकांडशेषः ॥ मुस्तमंबुधरो नृपतत्वंदः
कसेरुवदिति ॥ गूवाकः पूगः ॥ पूगोक्रमुकगूवाकौ तस्योद्वेगं पुनः फलमिति हेमः ॥ पूगेऽप्येवमपि

क्रमुको ब्रह्मदारुणि ताम्बूलमुस्तगूवाकरोध्रमिद्धपनीफले

क्रमुकं केवुकं पूगं चिक्काघोंटाफलं तथेति बोपदेवः ॥ खर्जूरीनारिकेरी च तालरैवतपूगकाः ॥ अशा
खोच्चा दृढदलाः संज्ञा तेषां तृणध्वजाः । विषघ्नप्रसिद्धाश्चेति । पोध्रभित् शावरदेशजः श्वेतरोध्रः ।
तिरीटक्षिप्तवकोरोध्रश्चान्यः शावरदेशजः ॥ श्वेतरोध्रः शावरोक्षिभैषज्यं शवरोद्भवमिति हृ
दयदीपकः ॥ शेलुमहीरुहो रोध्रो वटदीर्घदलः सितः ॥ सीरीकषायो हेमंतादाम्रः श्वेतत
रैः सुमैः ॥ सशंबो वत्सनामतस्यसोपयोगी तरन्नत्विति ॥ वयनीका प्यासिका चशालापुष्पीति हृद
यदीपकः ॥ ॥

शिघम्र·
७

कटुकेति॰राजिका आसुरी॥तुंव्यला वृक्षभेसमे॥करंजी त्र्यंगरवल्ली॥अथकरंजकः सिंछ्यगं
धोभूर्जत्वकुलक्ष्मपत्रोल्पशंवकटुति॥रोहिली कटुरोहिली॥कंकोलं कंकोली फलं॥कंकोल
कं कटुफलं मारी चं माधवोपितं॥तुलं वक्र फलं कोलं कटुकं कटुकाफलमिति॥कंकोली चल्लिकावा

॥कटुका राजिकातुम्बीकरञ्जी रोहिलीषु च॥
॥ली बेकंङ्कोलकत्र्योषत्रपुषेसर्षपेपु मान्॥

७

कपत्रामरिचसंफलेति॥त्र्योषंशुंठी मरिचपिप्पली समुदायस्येयंसंज्ञा॥त्रपुषंत्रपुषी फलं॥त्र
पुषीचिर्भटीचैवकालिंगेवरि पुंस्फली तिउशी शीले चूंती चमाया लीलघ्नचल्लिकाः॥प्रसि
द्धाःसर्वदेशेषु लक्ष्मीर्नामभिःसहेक्ति॥सर्षपःसरिषपःरक्षोघ्नःसर्षपश्चान्यःसिद्धार्थःश्वे
तसर्षपइतिल्लद्यदीपकः॥ ॥ ७

कण्टक इति॰ कोरकः॥ इंगुदः कोरको ह्रस्वः कंटकस्तापसद्रुम इति धर्म्मिष्ठः॥ इंगुदी दीर्घकंटका·
सितांगुलिर्दलाग्रारुफलसस्या महीरुहः रुक्ष्यपत्रेति॥ वेणुर्वंशः॥ पद्मबीजं पद्माक्षं॥ पद्मबीजं

॥ कण्टकः कोरके वेणौ पद्मबीजे तु कण्टकम् ॥
स्त्री शाल्मली कच्छुरयोः करकः सारलद्रुयोः॥

तु पद्माक्षं कलोड्यं पद्मकंटकमिति दैवलः॥ पद्मं शरदि दृश्यत इति च॥ शाल्मली स्थूलकंटका
॥ कच्छुरा यासः। यासो यवासो दुस्पर्शः कच्छुरा ताम्रमूलिकेति केयदेवः॥ करक इति॰ सारो दाडि
मी॥ छिद्रा दाडिमं तु मध्वम्लं तुल्याकारं प्रसिद्धकमिति॥ लद्राकुसुंभः॥ ॥

शिवप्र॰ कर्णिकेति॰ अरणिरग्निमंथः॥ अग्निमंथो रणिः केतुस्तकारीवैजयंतिकेतिनिघंटुः॥ दुर्गंधाऽ

८ रणिकाश्चितश्चाम्लकं यानुजातिभिः॥ सुमैः सारिदलश्चेति॥ सुमनो गोधूमस्तस्य चूर्णं क्षोदः॥ गोधूम

कोयवनकः सुमनश्च मनोमतदूतिकेयदेवः॥ कर्णिकरुति॰ तालो ध्वजवृक्षः॥ तालः सिद्धविशा

४ खोग्नः मस्तकूर्चपलो सितदूति॥ कोकिलाक्षस्तु क्षुरः॥ कोकिलाक्षे क्षुरक्षुराइस्समरः॥ अथे

क्षुरोऽग्रंथ्यभिकंटकः॥ तृणकोर्द्धगुल्मिदलः कर्कशः कृष्णकोहिरइति॥ तरली शतपत्री॥ शतप

कर्णिकारणो च कर्णिका श्च चूर्णे सुमनस्य कर्णिकस्ताले॥

योषितितु कोकिलाक्षे तरली मल्लयाश्च पद्मगर्भे च॥

त्री तरणपुष्पाकर्णिका चारुकेसरा॥ सहा कुमारी गंधाढ्यानी लालि कुलेसंकुलेतिनिघंटुः॥ व

त्रकंटका शतपत्रिका॥ पंक्तिपत्रा चेति॥ मल्लीशीतभीरुः॥ मल्लिका वाढकुसुमा वसंतत्रिपुसा

त्रिधा॥ महापुष्पा गुपुष्पा च दीर्घपुष्पा चतुष्यकाः॥ गंधे नास्या तराइति॥ सिंहस्तु मदयंतीग

वासीस्यादुटजं भद्रमल्लिका॥ मुद्गरः स्यात्सिचिकिलो याभवेदष्टपत्रकः॥ सुगंधा धोतिकातैलभा ८

विनी नवमालिका॥ सप्तला सुकुमारा च सुरभिः सूचिमल्लिकेति॥ पद्मगर्भो बीजकोषः॥ बीजकोषा

कामुकइति॰रम्यकोदेहका॥रोमकोरम्यकोदेहकानिंबकोविषमुष्टिकः।कामुकोमालकःक्षीरःशाकः
शाखोऽसिपीलुकइतिकैयदेवः॥अशोकोवीतशोकः॥अतिमुक्तोमाधवी।कामुकःसुवसुंतःस्यान्मा
धवीत्वतिमुक्तकइतिकैयदेवः॥माधवीचंपकदलातिलपुष्पामहालता॥स्थिरोऽङ्गुगागुच्छपुष्पासि
द्धार्होहायमार्चिति॥चंपकोहेमपुष्पकः॥किम्पाकइति॰परिव्याधोऽम्बुमोत्पलः॥किम्पाकोराजवृक्षश्च
परिव्याधोऽम्बुमोत्पलइतिधर्म्मिष्ठः॥किंपाकःस्यान्महाकालइतिहलायुधः॥सम्यकृपाकोस्येतिसम्पा

॥कामुकोरम्यकेशोकेचातिमुक्तेपिचम्पके॥किम्पाकस्तुपरिव्याधेकिम्पाकंवारुणी॥
फले॥अथकिंशुकःपलाशेनन्दीवृक्षेचपीततैलायाम्॥योषिति॥ ॥ ॥

कःशंकल्याणंपाकोस्येतिशम्पाकः॥स्वामीतुशामीशिंबिमकरतीतिविग्रहकृत्वाशम्पाकमित्याह॥अ
ग्रपत्रोमहाशंबीविटपीराक्षसवृक्षकइति॥वारुणीफलंरंद्रवारुणीफले॥ऐन्द्रीविशालाचसमवृक्षयोस्व
स्यमहाफले॥तिक्तेवनेस्थिरेइति॥अथकिंसुकइति॰पलाशोब्रह्मवृक्षः॥नंदीवृक्षःप्ररोही॥अधो
मुखपत्रशाखःवनस्पतिः॥पिप्पलभेदः॥नंदीवृक्षोऽश्वत्थभेदःप्ररोहीगजपादपइतिभावमिश्रः॥
पीततैलाज्योतिष्मती॥वह्नीतेजोवतीसमा॥ज्योतिष्मत्याःस्थिरासातुसिद्धावीरुत्गुणावकुरिति॥

शिवप्र.

१

कुशिक इति॰ अक्षो विभीतकः॥ अथ त्रिषु विभीतकी॰ तुषा यासंत संवर्त्तक कर्षफलस्तु ति नपुष्पका इति सिंहः॥ अथो द्रुमः॥ मधूक वद्दलैः रूक्षैः फलं तस्य विभीतकमिति॥ स्तंभ प्राचीनामलकं॥ प्राचीनामलकं रक्तं वं राजामलकं च ततः॥ प्राचीनागरमव्यक्त दिति सिंहः॥ प्राचीनामलकं तु अमुष्णं गुरु गरापहं॥ वातघ्नं पीत कफघ्नं त्वग्घ्नं तु वरपीत्तु बलं। इति वोपदेवः॥ सर्जः शालः॥ प्राकृ॰ शालं सर्ज्जं च सूरयइति हलायुधः॥ न्यग्रोध शाल्वाक्षोट करेष बहु रूधवादयः॥ चिरायुषो महास्कंधाः शतहस्तांतरोच्चगा इति॥ तत्र॰ सिंहः सारसारु दीर्घपत्रो लघु पुष्पक इति॥ दीर्घपत्रोरल्पः॥ अश्वकर्णः स्यादरल्पः सस्यसंवरणोपि च दीर्घ ॥ कुशिकस्त्व स्वेरक्रेस सर्ज्जे च दीर्घपत्रे च॥ कुलकं तु पटोले स्यात्कुलकः काकतिन्दुके॥ क्षुरकः स्त्वके॥ अत्रेतु गोक्षुर तिलके शरे॥ ॥

ँँ श्रसः कुशिक स्त्रीरिपत्र करतिके पदेवः॥ शोरखु इति लोक इति भावमिश्रः॥ कुलकमिति॰ पटोलं राजी फलं॥ स्वादुतिक्त पटोलस्त्वेतु वृश्चीमो दुर्गंध पत्रके। मदुके लोमशेश्चेतराजिमद्य वमधुपके॥ बिंबा नूकं फलमिति॥ काकतिंदुकः कुपीलुः। कुपीलुः कुलकः काकतिंदुकः काकपीलुकः॥ काकेंदुर्विषतिंदुश्च लोके तु कुचिलाभिधः॥ पादपो विषतिंदुः स्यात् दीर्घशाखु फलः कटुः॥ तद्बीजं वृत्त कठिनं शाणिकं पांडु लोमशमिति॥ क्षुरक इति॰ स्वकश्चिह्नक शिवकंटः॥ तिलकः श्रीमान्। तिलकः क्षुरकः श्रीमान्। मणेकं मुखमंडन इति धर्म्मिष्ठः॥ श्रीमानारेसुलः स॰

१

कृतकमिति। खंडलवणं विडं॥ कृतकं खंडलवणं स्याद्विडं धूर्त्तमासुरं॥ विडं चेति निघंटुः॥ अथशुष्कसैंधवं
गोमूत्रमज्जितं निर्वाप्यारनाले तत स्त्रिधा। खर्जिकां वुनितन्नाले मतधूमिनदाह्नितं॥ विडाभिधं स्यादि
ति॥ वं कोलं॥ वकोलं॥ विडंगं कृमिघ्नं॥ विडंग पादयोर्ग्गन्हत्तपत्रोणुपुष्पकः॥ मरिचाभफलोगुच्छ
मंजरीकइति॥ कोरकइति॰ इंगुदमूपसतरुः॥ कोलं कंकोलं॥ मृणालं विसं॥ कौशिकइति॥ पुरोगुग्गु
लुः॥ गुग्गुलुः कालनिर्यासोजटायुः कौशिकपुरइति धन्वंतरिः॥ गुग्गुल्वच्छदलाः सुमा॥ वल्लवीजा

कृतकं खवणुलवणे कक्कोलेच विडंकुके। कोरकोस्त्रीकुदके कोलेमृणा
लेकोशिकःपुरे॥ वत्सकेचाथगणिका यूथिका वद्भिमन्ययोः॥ ॥

सम्भूर्जेत्वकूअमरारखर्वपादपा॥ तद्भवोगुग्गुलुरिति॥ वत्सकः कुटजः॥ कुटजोमालतीप्रायपुष्पः
क्षीरीसशंवकः॥ तिक्तश्चंपकसच्छायपत्रोवर्षादिपुष्पितः॥ बीजमिन्द्रयवाद्दीर्घास्तिक्तः सर्वरत्त्व
गादिषु॥ पादपइति॥ कुटजकुसुमैः कल्पितार्घायतस्मैइति मेघदूतः॥ गणिकेति॰ यूथिका वा
लपुष्पा॥ यूथिका वालपुष्पा तु पुष्पगंधा गुलो हन्ना॥ प्रोक्ता म्याशंखधवलानामतः शंख
यूथिका॥ स्वर्णयूथ्यपरापीनागणिका स्वर्णयूथिकेति॥ वर्षासुयूथिकापुष्प्रमतकुच्छोमद्भिकायनः॥

शि० च० म० ग्रंथिकमिति० मागधंमगधाजटा। अथपिप्पलिकानाडी नागवट्टीरहस्नासृदु:॥ स्थिराफलंपिप्पली
१० तिमूलंतस्यात्तद्राह्वयमिति॥ ग्रंथिकं पिप्पलीमूलंमागधं मागधाजटेतिनाममाला॥ गूढच्छदनःकरीरः॥ करीरःकंटकीविषगपत्रः पादपःफलीति॥ ग्रंथिपर्णोनीलपुष्पः॥ तणकोग्रंथिपर्णस्तिसग्रंथ्यं मुलिपत्रकइति॥ गंधिवनाइतिलोके। अयंकच्चूरभेदइतिधन्वंतरिनिघंटुः॥ गुग्गुलुःपुरः॥ गैरिकमिति० धातुःगिरिमृत्त्। गैरिकंधातुभेदेस्याद्धातुमात्रेचकांचनेइतिविश्वलोचनः॥ स्त्रियांच०

ग्रंथिकं मागधे गूढच्छदनग्रन्थिपर्णयोः गुग्गुलौ गैरिकंधातौरुक्मेरक्तेचहट्टकेधातुमात्रेपि

((गैरिकागिरिमल धातुररुणद्वित्रिवर्णकेतिवाग्भटाचार्यः॥ रुक्मंकांचनं॥ हिरण्यंहाटकंरुक्मंसुवर्णंहेमकांचनमितिकैयदेवः॥ रक्तंहंसपादिकं॥ मणिरागकरंरक्तंगैरिकंहंसपादिकमितिधर्म्मिष्टः॥ स्थूलगंधकसंयोगाद्दरदंकृत्रिमारुणमिति॥ हिंगुलःशुकतुंडाख्योहंसपाकस्तथापरः॥ प्रथमोल्पगुणस्तत्रचर्मारःसनिगद्यते॥ श्वेतरेखःप्रवालाभोहंस
पाकःसईरितइतिवाग्भटाचार्यः॥ हट्टकं। रक्तोत्पलेकोकनदेहट्टकंरक्तसंधिकमितिकैयदेवः॥ रक्तोत्पलेगैरिकमितिहारावली॥ धातुर्मनःशिलाद्यद्रेगैरिकंतुविशेषतइत्यमरः॥ १०

चक्रांगीति॰मंजिष्ठा कालमेषी च समंगा विकसा स्त्रणेति धन्वंतरि निघंटुः॥समंगाद्विविधाधूर्त्त
फलानीलासुपीतकः॥रसोस्याः पश्चिमे॰क्षुद्रमंजिष्ठाका ष्ठगर्भिणी॥कोंकणेइति॥मत्स्यपि
त्ताकटुकी॥चित्रकइति॰पावकः पाठीनः॥चित्रको दहनो व्यालः पाठीनो दारुणोग्निकइतिध

चक्राङ्गी मञ्जिष्ठा मत्स्यपित्तयोः चित्रकः पावकेऽमलेतु चित्रकं मुखमण्डने

न्वंतरिः॥अमंडः आमंडः॥गंधर्वहस्तकोऽमंड आमंडो व्याघ्रपुच्छक इति तारपालः॥मुखमंडन
स्तिलकः॥तिलकः पूर्वकः श्रीमान् क्षुरकश्छिन्नपुष्पकः।मुखमंडनको रेची विदश्चित्रविशेष
कृइति धन्वंतरिः॥श्रीमान् विदश्छिन्नपुष्पस्त्री निरीक्षणदोहदः॥वसंतपुष्पितइति॥ ॥

शिवप्र०

११

चीनाक इति० कृतकर्पूरः प्रसिद्धः ॥ चीनाकः कृत्रिमः सर्वव्याधिजन्मैककारणमिति ॥ तृणधा
न्यमत्र काककंग्वाख्यं ॥ सितकंगु रक्तशामठी रक्तकंगु रक्तशोधिका ॥ चीनाकः काककंगुः स्यात्श्यामा
कृत्तृणबीजक इति । चीनकश्चीना ॥ चीनाकश्चीनकश्चीमतिके यदेवः ॥ दीर्घमंडपवल्लीफलं ॥ चि
र्भिटइ इति लोके ॥ चिर्भिटः श्वेतराजिः स्यात्सुदीर्घा गृहकूलक इति भावमिश्रः ॥ छुद्रिकेति० कंदरो
हिणी गुडूची ॥ जीवंती मधुपर्णी च तन्त्रिका कंदरोहिणी ॥ छिन्नानागकुमारी च छद्रिका ज्वरनाशिनी

चीनाकः कृतकर्पूरे तृणधान्ये च चीनके । छद्रिका कन्दरोहिण्यां
रक्तापां जतुको स्त्रियाम् लाक्षागुग्गुलुपालाश पर्पटे च पि हिंगुनि

इति निघंटुः ॥ वल्लीगुडूच्या विदिता स्थिरा मिश्रे प्ररोहिणीति ॥ रक्ता मंजिष्ठा ॥ जतुक इति० लाक्षा
लक्तो द्रुमामयः इत्यमरः ॥ पिप्पलस्य इव लाक्षा त्वक्ष्मिं श्वापि क्वचित्तराविति ॥ गुग्गुलुः पुरः ॥
पालाश स्त्रिपत्रः ॥ पर्पटो रजः ॥ पर्पटो जकवत्ता सिद्धस्तृणकः क्षेत्रसंभव इति ॥ हिंगुः सूपधूप ११
नं ॥ हिंगुर्भोलक वज्रिरो ॥ पृथुस्कंधः प्रकाशोस्य हिंगुनश्च तुरंगुलः ॥ ततः क्षीरं प्रच्छिन्ने हिंगुः शुद्धं
शुद्धं दलादिभिः ॥ मूलकाभं फलेरि जंतु टिवत्त हिंगुपत्रिकेति ॥ ॥ ॥

जीविकेति॰ जीवनीयाजीवन्ती॥ जीवंतीस्याज्जीवनीयाऽस जीवाजीवाजीव्या जीवदाजीवदात्री॥
शाकश्रेष्ठाजीवभद्राचभद्रामंगल्याचवसुदजीवाचसास्यादित्यभिधानचूडामणिः॥ वीरुज्जी
वंतिकाशाकः प्रसिद्धोग्न्जेरखुचेति॥ प्रियाजीवदः॥ जीवकोजीवदः क्षोदीमंगल्योमधुरः प्रि
यउत्तिकेयदेवः॥ जीवनीसदृशैः पत्रैर्जीवकोगुल्मकः स्थिरः॥ क्षीरीकंदीसदानूपविकाश्चश्चे
ति॥ सर्ज्जः पीतसारः॥ अथपीतसालके। सर्ज्जकासनबंधूकपुष्पप्रियकजीवकाइत्यमरः॥
द्रुमोऽसनः कोविदलोऽरुणपुष्पः कुसुमकरइति॥ विजयसाराख्यपाख्यातः॥ तनुकेति॰

जीविकाजीवनीयायांजीवकक्लिप्रियसर्ज्जयोः तनुकास्फूर्जेलतयोस्तनुवंतनुगुडत्वचि

स्फूर्जः कालस्कंधः॥ कालस्कंधः कालसारास्तनुकादीर्घनखस्यपि॥ स्यंदितास्फूर्जनः स्फूर्जोस्तो
केतेदूरूतिश्रुतस्ति॥ तिंदुकोविरयीकृष्णतनुर्म्मग्रोधसच्छदः॥ पलाशनफलः स्थूलच्छित्रिवीजो
मधुः शितिरिति॥ लताप्रियंगुः॥ श्यामानुमहिलाह्वया॥ लतागोवंदनीगुंद्राप्रियंगुः फलिनीफ
लीत्यमरः॥ श्यामाद्रोमहीरुहः॥ प्रियंगुर्वकुलाभासदलस्तन्मंजरीतनुरिति॥ गुडत्वग्गुडत्कं
टद्रुघंतनुकंस्वर्णभूमिकं॥ लाटपर्णंचसवल्कंत्वक्चोचंवल्कलंत्वचमितिकैयदेवः॥

शिवप्र०

१२

तिंदुकीति॰ कालस्कंधस्तिंदुकः॥ कालस्कंधस्तमालेस्यात्तिंदुके जीवकद्रुमे इति लोचनः॥ तिंदि
शं लोमशफलं फलशाकेषु सिद्धकमिति॥ तिलकमिति॥ मेचकं कृष्णवर्णं॥ कृष्णं च कृष्ण
लवणं मेचकं तिलकं लवणमिति केयदेवः॥ कृष्णे सौवर्चलं गुणो लवणो गंधवर्जितः इति वाग्भ
टाचार्यः॥ परोलं राजीफलं॥ श्रीमान्तिलकः॥ तरुणीकटाक्षकामो वासन्तः सुन्दरः श्रीमानि
ति धर्मिष्ठः॥ तिलो लोध्रः॥ लोध्रो रोध्रः सावरकस्तिरीटकस्तिलकाख्यः इति शुणारत्नमाला॥

तिन्दुकी स्यात्‌ द्वयोः कालस्कंधे लोध्रं तु तिर्गिरीशे तिलकं मेचके नातु परोले श्रीमते स्तिले दीप
को यवसाह्वायां जीरके लोचमस्तके ॥ ॥ ॥ ॥ ॥ ॥ ॥

दीपकइति॥ यवानी दीपकोदीप्यो यवसाह्वा यवानिकेति धन्वंतरिः॥ यवानी वातहरिका स्याद्‌ गुच्छद
नात्मलको यकः॥ अणुबीजं तु गुणवद्धेषं फलितिवत्ति जीरको जाजी॥ गौरादिजीरकस्त्वन्यो जाजी स्या
त्स्थूलजीरकः इत्यभिधानचूडामणिः॥ अजाजी शतपुष्पा चाजमोदा दरकृष्णकः॥ यवानी धान्यपृथ्वी
कादीप्यकादीनि भूरिशः॥ भवंति यत्र त्वेदारे संज्ञे षां त्वेणगंधकमिति॥ तत्र धन्वयासोपमो जाजी
त्वणको करटकस्तनुरिति॥ लोचमस्तक अजमोदा॥ अलंकारे यवान्यो च दीपको लोचमस्तक इति
रभसः॥ अजमोदाद्वयं प्रोक्तं छयंतनुदलं तनु॥ क्षेत्रे विस्तीर्ण पत्रं च तत्र तीक्ष्णो जमोदकः॥ सूक्ष्मः १२

शीप्यकइति॥वस्तमोदा अजमोदा॥यवानीयवसाह्वा॥बर्हिचूडाशिखिचूडा॥बर्हिचूडातुशिखिनीशि
खालुःशुषिरान्निखा॥शिखावलाकेकिशिखामयूराद्याभिधाशिखस्यभिधानचूडामता॥शिखि
चूडातुलक्षणकामंजर्य्यस्यायथार्थका॥आयतार्थेजदलायंमिसुमतिग्रजःकुबेरकः॥नर्त्तकीति
शून्यमध्यानली॥नलिकाशुषिराशून्यानिर्मध्यानर्त्तकीनटी॥धमनीविद्रुमलताकपोतचरणानली
तिकेयदेवः॥नलिकाउत्तरापथेप्रसिद्धासुगंधप्रवालाकृतिःक्वचिसवारीतिप्रसिद्धितिभावमिश्राः॥

शीप्यकोवस्तमोदायांयवान्यांबर्हिचूडयोः॥नर्त्तकीशून्यमध्या
यांनलनीवारयोर्नरि॥नलिकानाडिकाशाकेनिर्मध्यायांच॥

नलःपोटगलः॥नीवारोमुनिप्रियः॥मल्लिनकोनृत्यकुंडोनर्त्तकोनर्मकुंडकः॥नीवारस्तुंडुकाउड्डी
वनव्रीहिर्मुनिप्रियइतिकेयदेवः॥नरिपुल्लिंगे॥नलिवेति॥नाडीचक्रीजलाभ्यर्णकवायकु
सुमाम्रदुः॥सिद्धेतियथापूर्वमधःपत्रत्यागीकंदविशेषकः॥तस्यैवनाडीनलिकानालिकाच
प्रकीर्त्तितेतिकश्चित्॥सिद्धमंत्रप्रकाशेतु॥कलंबुर्नालिकः॥नाडीयामालिकाःलयोर्द्विक्षणोक
लंबुर्नलिकःस्यात्सुषिरोबकुलोयजः॥तंद्धेतोनालिकाश्लक्ष्णान्तेयासाम्याकलंबिकेति॥नि

नीलिकेति। जलनीली जलजन्तुरः॥ उष्णीषसंज्ञः सरसी रुपेषु पापोऽप्रसूनेषु च नीलिकास्थिति
विद्धैघवल्लभा॥ युग्मफला इंदीवरी॥ करंभा कर्कशा दोषारी दीर्घवृन्तमारणी॥ इंदीवरी युग्म
फला सुनीलीनीलिका चेसितिकेपदेवः॥ शेषाली पुष्पवर्षिणी। निर्गुंडीकट्टुम्लाद्ध संदला॥ गु
च्छापनासस्या सिताम्याता दृशी तनुः॥ शेफालिकेति। प्रयोगश्च। वयमितरथा शेफालीकुसुम
लकुसुमास्तु चेति॥ श्रृंगारहारशनिवृन्दार एपदिषुप्रसिद्धा॥ नीलिनी नीली॥ नीलीनीलानी

॥ नीलिका॥ जलनीलीयुग्मफला शेफालीनीलिनीषुच॥ पालङ्कः शल्लकी शाकभेदयोः॥

लिनीनीलपत्री तुच्छा राजी नीलिकाकालपुंखेति निघंटुः॥ अमलावल्ली कालपुंखाम सूरलूरद्ध
देति॥ पालंक इति। शल्लकी गजभक्ष्या। शल्लकी सघ्रकी ह्लादासुरभिः सुस्रवा रसा तिंदलादि
श्च। सुगंधिद्रवका नित्या पंक्तिपत्रा तु शल्लकी। शारवा ग्रेपद्मरागाभाविंदवहूति॥ अत्रशा
कभेदः पालक इति लोके स्यातः॥ पालंक्या वास्तुकाकारा किंचित्स्थूलरतपत्रिकेति गुणरत्नमा	१३
ला॥ पालंकः शाकभेदे स्याच्छल्लक्यां याज्ञि पक्षिणीतिहेमः॥ ॥

अथपावकइति॰ भल्लातकोरुष्करः॥ भल्लातः पादपः ग्रस्सदलोस्यारुणपुष्पकः॥ तनुक्षीरीच तस्यफलंतेष्वितिवफलंमधु॥ यवोदरंत्रिपुरकेतदग्रस्थिसमंपृथक्॥ रूम्भंपरिणतेतस्मिन्न र स्येप॥ तारुष्करंतदइति॥ विडंगः क्रमिघ्नात्रुः॥ वह्निमंथोरणिका॥ चित्रकोऽग्निकः॥ प्राणकइति॰

अथ पावकः॥ भल्लातकेविडङ्गे चवह्निमंथे
चचित्रके॥ प्राणकोजीवकेचोले॥ ॥ ॥

जीवकः प्राणदः॥ चोलोगंधरसः॥ श्रीवासः सरलोचोलः कुंदुरुश्चेतिपादपाः॥ पृथक्पवन देशस्थाः क्रमाज्जेयामथाकृतिः॥ करवीरोपमः पूर्वः सरलः शाल्मलीसमः॥ कुमारीछदनो चोलः॥ कुंदुरुः शल्लकीसमः॥ एषांद्रवाः स्नुताद्वृक्षादादीयंतेचतेशवैरिति॥ ॥ ॥

प्रियक इति॰ असनो जीवकः ॥ प्रियको जीवकोऽसन इति रत्नकोषः ॥ आसनोऽपि पीठे भस्कंधयो
ः स्त्री चमासनं नातु जीवक इति रुद्रभसौ ॥ प्रियके त्वासनो सन इति द्विरूपकोषः ॥ विजयसार
इति लोके प्रसिद्धः ॥ नीपः कदंबः ॥ वृत्तपुष्पो बहुफलो हारि इस्त्वहलिप्रियः ॥ धाराकदंबो सो धू
लीकदंबः स्याद्रसेन जइति सिंहः ॥ कुंकुमं वाह्लीकं ॥ कुसुंभसदृशे गुच्छे तल्लाणके कुंकुमं स्मृतं ॥ भो

टकाश्मीर विषये तनु वाढतया द्विधा ॥ उजनरं शुभमद्रो चेति ॥ महिला प्रियंगुः श्यामा तु महि

॥ प्रियको सननीपयोः ॥ कुङ्कुमं महिलाह्वायां पिण्याकः
पुन्नपुंसकः तिलकल्के च यावाह्लीके सूपधूपन सिह्लयोः ॥

लाह्वया लता गोवंदनी गुन्द्रा प्रियंगुः फलिनी फली समरः ॥ परमहिला महिलालामिव परिह
रन्निति वाणभट्टः ॥ महेलापि ॥ परमहेलारतो व्यपार दारिक इति रमयंती काव्यम् ॥ पिण्याक
इति॰ तिलानां कल्कस्तिलकल्कः ॥ कल्को दृषद्दिपिष्टः ॥ वाह्लीकं कुंकुमं॰ वाह्लीकं वह्निकं १४
धीरं हिंगु नेरिति त्रिकांडशेषः ॥ सूपधूपनं हिंगु ॥ सिह्लः पिंडितः ॥ तुरुष्कः पारदः सेलु दललवण
लवीजकं ॥ शैलेयस्तत्रसः सिह्लमिति ॥ गांधिकद्रव्यं ॥ शिलारस इति लोके ॥ ॥

पीतकमिति। गंजनः गजरं॥ नारंगाकं रंगजरं पीतकं गंजनस्त्वथेति केयदेवः॥ गंजनो ऽरुणकंदस्तु प्र सिद्धो नीचवस्त्रभइति॥ तालं हरितालं॥ हरितालं द्विधा प्रोक्तं पत्राख्यं पिंडसंज्ञकं॥ तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परं॥ स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत्॥ पत्राख्यं तालकं विद्यात् गुणाढ्यं तद्रसायनं॥ निःपत्रं पिंडसदृशं स्वल्पसत्वं तथा गुरु॥ स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिंडतालकमिति॥

पीतकं गंजने ताले चम्पके कुंकुमेऽभ्रके॥ कुसुम्भे जीरके चाथ स्त्रियां॥ कोशा तकीभिदि॥ निशा कूष्मांडपृथ्वीषु किंकिरातेतु पीतकः॥ ॥ ॥

चंपको हेमपुष्पकः॥ कुंकुमं रक्तं॥ अभ्रकं गिरिजामलं इत्यमरः॥ कुसुम्भं लट्टू॥ जीरकमजा जी॥ स्त्रियां तु पीतिका प्रत्ययस्थात्कादितीत्वं॥ कोशातकीभिदत्र स्वादुकोशातकी॥ कोशातकी स्यात् त्रिविधा मार्गवपटोलविषिति हृदयदीपकः॥ निशा हरिद्रा॥ निशामिईकरहलहन्न कंदः प्राच्यां क्षेत्रेषु सिद्धकइति॥ कूष्मांडः पुष्पफलं॥ पृथ्वी गणकारिका॥ किंकिरातः पीतपुष्पः सहचरः॥ पांथाभ्यिकं यपतिकेशवकिंकिरातइत्यमरचंद्रः॥ ॥ ॥ ॥ ॥ ॥

पुष्पकरस्तिः गंधकोलेलीतकः ॥ श्वेतद्वीपेपुरादेव्याः क्षीरं त्वयारजसासहुतं ॥ दुकूलेतेनवस्त्रेणस्ना
नायः क्षीरनीरधौ ॥ मध्ये तस्यद्रजस्तस्मात् गंधकः समजायत ॥ चतुर्द्धा गंधकः प्रोक्तो रक्तः पीतः सितो
सितः ॥ रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ॥ व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सदुर्लभ इति
रसार्णवमिश्रः ॥ तालकं हरितालं ॥ कालवालुकवंकुष्ठम् ॥ हिमवत्पादशिखरे वंकुष्ठमुपजायते ॥
तत्रैकं नालिकाख्यं हि तदन्यद्रेणुकं मतं ॥ पीतप्रभं गुरु स्निग्धं श्रेष्ठं वंकुष्ठमादिमं ॥ श्यामपीतं

॥ पुलकोगंधके तालेपुलकं कालवालुके ॥

लघुत्यक्तसत्वं नेष्टं हि रेणुकं ॥ केचिद्वदंति वंकुष्ठं सद्योजातस्य दंतिनः ॥ वर्चश्च श्यामपीताभं रेच
नं परिकथ्यते ॥ कतिचिद्वाजिवाहानां नालं वंकुष्ठसंज्ञितं ॥ वदंति श्वेतपीताभं तदतीव विरेचन
मिति रसरत्नसमुच्चये वाग्भटाचार्यः ॥ अथ पश्चिमशैलजं विषवृक्षसमं पञ्चराजिकासदृशं
रसे ॥ तत्वंकुष्ठं कंकुष्ठं रेचनं रंगनायकं ॥ शोधनं पुलकं ज्ञासंवरांगं कालवालुकमिति सिंहः ॥ कं

कुष्ठोधातुश्चाम्येमहारुहः ॥ वयायज्ञकुनः ॥
कुष्माण्डपुष्पोविफलासितद्वत्स्ये ॥ ॥

पृथ्वीकेति॰ पृथुला हिंगुपत्री॥ हिंगुपत्री वेणुपत्री कारवी वाष्पिका पृथुः॥ पृथ्वीका पृथुला
पिंगा रामठी चारुपत्रिकेति केयदेवः॥ पार्थी आदिसभक्ता॥ अर्कपुष्पी च पृथ्वीका पार्थी ब्रह्मसु
वर्चला॥ अर्ककांता दिव्यतेजा स्तोकेऽकुलकुलेति सौतिनिघंटुः॥ सादिसा हस्तलपत्रा च सुगंधा
शंखिनी मृदुः॥ पुनर्नवा समा बोध्या विटा ब्राह्मसुवर्चलेति॥ कारवी कालीका॥ कालीका कार
वी पृथ्वी पृथ्वीका सोपकुंचिकेति॥ बहुला बृहदेला॥ पृथ्वीका चंद्रवालैला निष्कुटिर्बहुला
चेत्यमरः॥ सूक्ष्मारिदितिनीक्षेत्रे स्यगुप्ता चंद्रिका त्रुटिः। बृहतीति॥ पृथुकइति॰ चिपिटः सुतुवा

पृथ्वीका पृथुला पार्थी कारवी बहुला सुच॥ पृथुकश्चिपिटे चारुपत्रिका यांतु यो
षिति॥ बन्धूको स्त्री बन्धुजीवे बंधूकः पीतसालके॥ वाल्लुकं नद्यो मूत्रफले च हीवालुके॥

ईश्विन्नभृष्टकंडिलशालिः॥ चारुपत्रिका हिंगुपत्री॥ बंधूकइति॰ बंधूकं बधुकं प्राकृ रितिद्विरूप
कोषः॥ बंधुजीवः शरत्पुष्पः॥ रक्तपुष्पः सितपुष्पश्च बंधुजीवः शरत्पुष्पो बंधुबंधूकरक्तकाइति
केयदेवः॥ अर्कगुलिं छदो रक्तकुसुमो बंधुजीवकः। विटगंधः स्थिरामुञ्जरिपुबीजः सितोपि चे
ति॥ पीतसालकः सर्जः॥ पीतसालस्तु सर्जकइति सिंहः। बंधुकं बधुजीवे स्याद्बंधुकः पीतसा
लकइति लोचनः॥ वालुकमिति॰ मूत्रफलं॥ वालुकं मूत्रलं मूत्रफलमिति निघंटुः। हरिवालु
कं एलवालुकं॥ एलवालुकमैलेयं सुगंधि हरिवालुकमित्यमरः॥ शीतलचीनीति प्रसिद्धं लोके॥

16

भूतीकमिति दीप्यो यवानी। यवानीदीप्यकोदीप्यो भूतीकं भूकदंबक इतिनिघंटुः॥ कर्पूरो हिमवालुका॥ कर्पूरो हिमचंद्राख्यो भूतीकं हिमवालुकेति धर्म्मिष्ठः॥ अथ रंभासमो द्रुमः। विकाष्ठगर्भः कर्पूरउच्चैरपि च तत्र तु॥ एकैकभूर्जांतरितचंद्ररत्नानि सर्वशः॥ आमधंसारवत्तत्र स्थूलखंडमनुत्तममिति॥ ईशावासोभ्रशंभ्वेतो हिमसंज्ञस्ततः पांडुरः। श्वेतः पोताश्रयः सेर्वर सवीर्यविपाकतः॥ प्रभावेणापि ने प्रोक्ताः पूर्वं पूर्वं गुणाधिकाः॥ तत्रापि यश्च क्षुद्रः स्यात्स्फटिकाभः सउत्तम इतिनिघंटुः। सिह्लकः पिण्याकः॥ मालातृणं भूस्तृणं छत्रातपुष्पो यगंधिनीति

॥ भूतीकंदीप्यकर्पूरसिह्लकाभूस्तृणकत्तृणे॥ भूनिम्बवस्तमोदायांचिरिविल्वेकयुग्मले॥

सिंहः॥ भूस्तृणं रोहिषो भूतिर्भूतीकं चकुरुंबकः॥ मालातृणं चपालिंदी चधिरध्वनि बोधक इति धन्वंतरिः॥ तृणं सुगंधिभूतिकमन्यूपदे चेति॥ कत्तृणं रामकर्पूराख्यं अथगंधतृणे रामकर्पूराख्ये हिकत्तृणमिति सिंहः॥ कत्तृणं सकलं भूतिर्भूतीकं रोहिषं तृणं॥ श्यामकं श्यामके पौरं पुरुषं देवगंधकमिति धन्वंतरिः॥ अथ भूतीकं तृणं रोहिषं तन्वितिति॥ भूनिंबो रामसेनः॥ अथ भूनिंबो भंगपत्रो गिरोसमः॥ सुवर्णपुष्पातृणक इति॥ बस्तमोदा ऽजमोदा॥ चिरविल्वः करंजभेदः॥ अथ करंजकः॥ सिद्धोग्रगंधो भूर्जेल्वकः सूक्ष्मपत्रोऽप्यशंयकः॥ चिरविल्वस्तदुपमस्तत्फलोऽप्य ९६

मिथान्वितइति॥ कटफलः कटुफलः॥ कटूफलः सधवः शोलेपाटय इति॥ ॥

मधुकमिति० क्लीतकं यष्टी ॥ मधुयष्टी यष्टिमधु क्लीतकं क्षौद्रसाह्वयं ॥ यष्ट्याह्वं मधुकं यष्टी
ति रुद्रयदीपकः । यष्टीमधुकमिति च । मधुयष्टी च यष्टी च यष्टीमधुकमेव चेति वाचस्पतिः ॥ अ
थस्यान्मधुकं गुल्मः स्वल्पमपि क्षुरपुंखवत् । किंचिन्महान्दीर्घपत्रोऽस्यमहत्त्वासमिदस्यस्त्विति
॥ कृष्णकंगुः प्रसिद्धः ॥ कंगुस्तु कंगुली कंगुः प्रियंगुः पीततंडुला ॥ सा कृष्णा मधुकेति हेमः ॥
काश्मर्य्यः श्रीपर्णी ॥ श्रीपर्णी सर्वतोभद्रा काश्मीरी काश्मरी मुद्री ॥ गंभारी करूफला हीरा का

मधुकं क्लीतके कृष्णकङ्गु काश्मर्य्ययोः स्त्रियां ॥ मधूकं क्षौद्रसाह्वयां
मधूकस्तु मधुद्रुमे ॥ मण्डूकी सूर्यभक्तायां मण्डूकस्तु कुटन्नटे ॥ ॥

श्मर्य्यां मधुपर्णिकेति केयदेवः ॥ मधुका मधुपर्ण्यां स्त्री मधुकं क्लीतके पुनरिति मेदिनी ॥
श्रीपर्णी च प्रसिद्धा ॥ महाश्रपत्रा तत्तुल्याल्पफला मोदिनी द्रुम इति ॥ मधूकमिति ॥ क्षौ
द्रसाह्वा मधुयष्टी ॥ मधुद्रुमो गुडपुष्पकः ॥ एला फलस्तीक्ष्णसारो मधूको गुडपुष्पक इति कैय
देवः ॥ मधूको द्रुमस्ततः सुमे । प्रसिद्धमिति । मंडूकीति० सूर्यभक्ता सवर्चला ॥ सुवर्चलादित्यकां
ता सूर्यभक्ता सुखोद्भवा ॥ मंडूकपर्णी मंडूकी वरदादित्यपर्ण्यपीति धन्वंतरिः ॥ कुटंनटं हिंडु ॥

17

माक्षिकमिति॰ सिक्थकं मयणं ॥ मयणं सिक्थं मधूच्छिष्टमिति हृदयदीपकः ॥ क्षौद्रं मधु मधुक्षौ
द्रं पुष्परसो मक्षिकाविड् माक्षिकमिति हृदयदीपकः ॥ धातुमाक्षिकं सुवर्णमाक्षिकं । स्वर्णमाक्षि
कमाख्यातं तापीजं मधुमाक्षिकं ॥ ताप्यं माक्षिकधातुश्च मधुधातुश्च सस्मृत इति निघंटुः ॥ सुव
र्णशैलप्रभवो विष्णुना कांचनो रसः ॥ तापी किरातचीनेषु यवनेषु च निर्मितः ॥ ताप्यः सूर्यां
शुसंतप्तो माधवे मासि दृश्यते ॥ मधुरः कांचनाभासः साम्लो रजतसन्निभः ॥ तत्सेवनात् जराव्या
धिविषैर्न परिभूयते ॥ माक्षिको द्विविधो हेममाक्षिकस्तारमाक्षिकः ॥ तत्राद्यं माक्षिकं कामा

माक्षिकं । सिक्थके क्षौद्रे माक्षिको धातुमाक्षिके ॥ मार्षको रक्तवास्तूके जीवशाके च ॥

कुब्जो स्यं स्वर्णमाक्षिकं । नयतीतीरसंभूतं पंचवर्णं सुवर्णवत् ॥ पाषाणो बहलः प्रोक्तस्ताराख्यो
सो गुणाल्पक इति वाग्भटः ॥ मार्षक इति॰ रक्तवास्तूको गोडवास्तुकः ॥ सतीनजं वास्तुकं च कास
घ्नश्च गणकाभिधं ॥ कौसुंभमथ वज्राग्रं कुंतली चेति सिद्धका इति ॥ वास्तूकं वास्तुकं च स्यात् क्षा
रपत्रं च शीकराट् ॥ तदेव तु बृहत्पत्रं रक्तं स्यात् गौडवास्तुकमिति ॥ जीवशाको मार्षः ॥ मारिषो १७
मारुषो मार्षो जीवशाकस्तथैव चेति गुणनाममाला ॥ ॥ ॥

मूषिकेति॰ देवदाली गरागरी॥ जीमूतको देवताडो वृत्तकोषो गरागरी॥ मूषिका ऽति खुराकस्थ
तर्करीसेव कीर्तितेति धन्वंतरिः॥ सितपी मारूरोगः पुष्पे देवदाली त्रयं मतं॥ वदूर्यस्तिक्ताः
स्थिरा एत्ता ककर्कोराभद्रलेपरे॥ आधाफलं दीर्घकंटलघुहृत्तं चतारतीति॥ द्रवंती दंतीभे
दः॥ द्रवंती शंबरी फंजीन्यग्रोधी मूषिकाह्वया॥ प्रत्यक्श्रेणी सुतश्रेणी वृषघंटा खुकर्णिके
तिकेयदेवः॥ दंती गुल्मकः॥ द्रवन्ती वल्ली॥ अरिहन्त्रे दलैर्दंती एरंडतनुसंफला॥ स्थिराणु
स्मानूपदेशे छिन्नस्य च्छुपयः स्रुतिरिति॥ वहुस्पाखुकर्णी प्रतनुः हृस्वभावृत्तपत्रिकेति॥ मो

॥मूषिका॥ देवदाल्यां द्रवन्त्यां च मोचकः शिग्रुपिच्छयोः॥ रम्भायां॥

चक इति॰ शिग्रुः शोभांजनः॥ घनच्छदस्तीक्ष्णगंधो मोचको वदच्छ इति धर्म्मिष्ठः॥ पिच्छाशा
ल्मलिवेष्टकः॥ पिच्छा मोचकनिर्यास मोचकाविति केयदेवः॥ रंभा कदली॥ पीतवर्णफला
या च सा चंपककदल्यपि॥ कृष्णवर्णा तु सा चंपा रंभा तु सितवर्णिका॥ वृहत्फला तु माहेंद्री मा
चा त्वल्पफला ह्रिया। या तु कर्पूरगंधाढ्यफला राजकदल्यसौ॥ कर्पासवद्बीजफला का
ष्ठीला जायते च न इति सिंहः॥ ॥

यवक इति ॰ ह्रस्वयवः कुत्सितो यवो यवकः ॥ निदाघाकन् ॥ यवकान्नचशीलयेदितिवाग्भ
टः ॥ अत्र शालिप्रभेदो यवाकारतंदुलः ॥ यवकाहायनाः पांसुवाप्यनैषधकादय इति वा
ग्भटः ॥ याज्ञिक इति ॥ कुशोदर्भः ॥ पालाशो ब्रह्मवृक्षः ॥ खदिरो बालपत्रः ॥ शमी दलस्तरुः
शैले ॥ पलसस्य कषायकः ॥ खदिरोस्य वसारो धः संस्थः सारस्तदाह्वयः ॥ युज्यते तत्र रागार्थे
तरभावेतु साधितः ॥ तद्वृक्षवल्कनिर्यासो घनः शुष्कोगुल्मोतरः ॥ सारादयपसयोज्योवासरः

यवको ह्रस्वयव शालिप्रभेदयोः याज्ञिकः कुशपालाशखदिरे
यावको निशि अलक्तके सिक्थके च यूथिका म्लानवालयोः ॥

खदिरजोपि सर्पि इत्ति ॥ यावक इति ॰ निदाघपीतदाम् ॥ दाक्षी कुल्माषवसनत्रैरंकोठ सदृशैगिरौ ।
क्षीरिणी चेति ॥ अलक्तकः ॥ यावोलक्तो द्रुमामय इत्यमरः ॥ सिक्थकः पिण्याकः ॥ यूथिकेति
॰ अम्लानो किंटप्रभेदः ॥ अम्लानस्त्वमलेकिंटीप्रभेद इति हैमः ॥ अम्लानो म्लानदनः मोक्तस्त
थाम्लातकस्त्यपि ॥ कुरंटको वर्णपुष्पः स एवोक्तो महासह इति भावमिश्रः ॥ यूथिका तु मता
यूथ्याम म्लानकुसुमे क्वचिदिति विश्वलोचनः ॥ बालपुष्प इति गोडादौ प्रसिद्ध इति भावमिश्रः ॥ वाला प्रहसंती ॥ प्रहसंती तु यूथी स्यादिति
त्रिकांडशेषः ॥

रक्तकमिति॰ शुल्वं ताम्रं॥ ताम्रं म्लेच्छमुखं रक्तमरविंददलप्रभं॥ शुल्वमिति निघंटुः॥ ताम्रं द्वे
धा शुभाशुभं नेपालसंभवं शुद्धमकिट्टं मृदु शोणितं॥ पाश्चात्यसंभवं गुरु रूक्षं समायामिश्रं च द्रा
रुणमिति॥ बाह्लीकं कुंकुमं॥ प्राचीनामलकं लोके प्राचीनागारी चापि रक्तकमिति निघंटुः॥

रक्तकं शुल्वबाह्लीकप्राचीनामललोहिते रक्तको रागिनपयोर्गुञ्जाराजिकयोः स्त्रियाम्

प्राचीनामलकं लोके पानीयामलकं मतमिति भावमिश्रः॥ लोहितं हिंगुलः॥ रागी विचित्र
कः॥ विचित्रो रक्तको रागी विशोकस्ताम्रपल्लवइति केयदेवः॥ जपा जवा॥ जपापुष्पं जवापु
ष्पं मंड्रपुष्पं जवा जया॥ पिंडपुष्पं हेमपुष्पं॰ त्रिसंध्या लवरुणा सितेति केयदेवः॥ गुंजा काकणं
ती॥ राजिका आसुरी॥ ॥

शिवम॰ रम्यकइति॰ परोऽलंराजफलं॥तस्यमूलम्॥परोलंस्याद्राजफलं॰तस्यमूलेतुरम्यकमिति त्रिकांड
१९ शेषः॥विषमुष्टिकोमेऽकः॥रुचकमिति॰ स्वर्जिकाक्षारः सर्जिक्षारः॥स्वर्जिकाक्षोणिकातुल्या

१९

रम्यकस्तुपरोलस्यमूलेचविषमुष्टिके॥रुचकं ॥
स्वर्जिकाक्षाररोचनारूपगंधयोःरुचौतुङ्गेचरुचके॥

ऽहिताक्षारतांगतेति॥रोचनागोरोचना॰सफाःशिरसिपीतातुरोचनाक्रियतेशवैरिति॥रूप
गंधंसौवर्चलं॥शुद्धसैंधवं॥स्फटिकाभंचविधाप्यत्रिस्त्रिनिर्वापयेत्ततः॥जंवीरांवुनि १९
लुंगांवुन्यथशंखद्रावांवुनि॥त्रिस्त्रिर्निर्वा

पित्तं भूयस्तेषां वा चूर्णितेषु च ॥ त्र्यूषणत्रिपिप्पलीचूर्णैः प्रत्येकं तत्तु नस्त्रिधा ॥ संमृज्य सा
धितं कुर्यात्तद्धि सौवर्चलं शुभमिति ॥ रुवु रुरुवूकः ॥ रुवुको रुचुको प्रोक्तो वुरुवूकोपि ता
दृशः ॥ रुवूकश्च · त्रुवूकस्तैलेन समन्वितो मं भक्ताभेयदामसमीरणानामिति स्नोलि
वाराजः ॥ लुंगो बीजपूरः ॥ रुचको बीजपूरे च निषेदंतकपोलयोरिति मेदिनी ॥ मातु
लुंगो बीजपूरो लुंगो मध्याम्लकेसर इति केशवदेवः ॥ लुंगंद्वयं च जंबीरं नारंगं लकुचं त
था ॥ वृत्तद्रुमोपपत्राभ्यां दीर्घकंटकपादपाः ॥ अस्मांतरामिथो संज्ञा कृते षां कंटकेस
राः ॥ लुंगं प्रस्थार्द्धवार्द्ध च जंबीरं च तदर्द्धकं ॥ ततो द्विपलमात्रं तु मानं पथ्येषु पीतता
॥ भशाडरुलं तु नारंगं सर्वं केसरकोषकैः ॥ क्रमवृत्तैः फलं पूर्णं कंटकेसरसंभवं ॥
॥ ॥ द्विर्गुंजैर्मृदुके बीजे संयुक्तानि क्रमशस्तथा ॥ कंटकेसरकोषाभ्यां पृथग् नारं
गजंबीरयोः ॥ कोषस्पर्शाद्दिसंमुचे जंबीरं मृदुकेसरं ॥ कंटकेसरवर्गे तु लकुचे भ्र
शं दोषफलमिति ॥ ॥ ॥

रेणुकइति० शीतवद्द्रुभः पर्प्पटः॥ कौंतीहरेणुः। हरेणूरेणुकाकौंतीतिहृदयदीपकः॥ कौंत्यास्त्व
पादपोवृत्तपत्रोपुष्पः फलस्यच॥ वीजंतुकौंतिकासंज्ञंतिक्तमिति॥ रेचकमिति० काम्बवाल्लुकंकं
कुष्टं॥ मुकूलकं दन्तीबीजं॥ लोणीकेति० लोणिकाशाकः॥ लोणिजाइतिख्यातः॥ कस्वघृहन्द्रे

रेणुकाः शीतवद्द्रुभे॥ कौंसांस्त्रीरेचकंकाकवाल्लुकेचमु॥
कूलके। लोणीकालोणिकाशाकचाङ्गेरीशाकयोः स्त्रियाम्॥

नसद्विविधः॥ लोणालोणालोणीचकथिताः वृहल्लोणीतुघोटिकेतिभावमिश्रः॥ चाङ्गेरीअम्ल
लोणिका॥ चांगेरीचुक्रिकादंतशठाम्बष्टाम्ललोणिका॥ अश्मंतकस्तुशफरीकुशली चाम्लप
त्रकइतिभावमिश्रः॥ ॥ २०

वसुक इति॰ शिवमल्ली पाशुपतः ॥ रौमकं शाकंभरीलवणं ॥ रुमालवणमस्वानिः स्यात् ॰ रौम
कं तु रुमाभवमिति हेमः ॥ वाह्लीकेति॰ धान्यं धान्यकं ॥ धान्याकं धन्यकं धान्यं कुस्तुंबुरु धनीय
कमिति रभसः ॥ हिंगु सहस्रपधूपनं गृहिणी मधुरा हिंगुस्रूलघ्नि दूसूप धूपनमिति त्रिकांडशेषः
॥ कुंकुमं रक्तं ॥ वार्त्ताकमिति॰ वार्त्ताकु वर्तिंगणः ॥ वार्तिंगणस्तु वार्त्ताकुर्वार्त्ताकः शाकबिल्व
कः ॥ क्लीबे वंगं च वार्त्ताकी स्यान्महावृहतीत्यपीति त्रिकाण्डशेषः ॥ वार्तिंगणस्तु वार्त्ताकोवा

॥ वसुकः शिवमल्ल्यां स्याद्रौमके तु नपुंसकम् ॥ वाह्लीका· वाह्लिकाधा
न्यकी वे हिंगु निकुंकुमे ॥ वार्त्ताके त्रिषु वार्त्ताको वृहती क्षुद्रयोः स्त्रियाम्

र्त्ताकः शाकबिल्वक इति रभसः ॥ वार्त्ताकं कटुतिक्तोष्णं मधुरं कफवातजिदिति वाग्भटः ॥ वा
र्त्ता वार्तिंगणो वृन्ताकिति विश्वः ॥ वृहती सिंहिका ॥ वृहती सिंहिका क्रान्ता वार्त्ताकी राष्ट्रिका
कुलीति धन्वंतरिः ॥ क्षुद्रा क्षुद्रकंटकी· वार्त्ताकी धावनी व्याघ्री कंटाली क्षुद्रकंटकी
ति धर्म्मदासः ॥ - ॥

वार्ष्यिकमिति॰ त्रायमाणा त्रायन्ती॰ तणका त्रायमाणा तु स्थिरा मार्कवसंदस्लेति॥ अत्र माक्षि
काभित्यं॰ वार्षिकी त्रिपुटा त्र्यस्रा सुरूपा सुभगा प्रियेति धन्वंतरिः॥ वाष्पिकेति॰ कारवी पृथ्वी
का॰ कारवी कारवी पृथ्वी सुरवधा वाष्पिका पृथुरिति धर्मदासः॥ हिंगुपत्री हिंगुप्रकृतिः॥
अथ बीजकइति॰ बीजपूरो मातुलुंगः॥ पीतसारस्तु सर्जकइति सिंहः॥ वृक्षकइति॰ कु

वार्षिकं त्रायमाणायां वार्षिकी मक्षिकाभिदि॥ वाष्पिका कारवी हिंगुपत्र्योस्यादथ बीज
कः॥ बीजपूरे पीतसारे वृक्षकः कुटजे धवे॥ स्त्रियां तु कन्द रोहिण्यां वृषकस्त्वाटरूषके ऽथ
रेवरषण्डे दे॥

टजेस्य वृक्षः॥ धवो धुरंधरः॥ कंदरोहिणी गुडूची॥ वृषकइति॰ अटरूषको वासा॰ वृषो वासा
टरूषकइति माधवः॥ वैद्यमाता टरूषकः सिंहास्यो वाजिदंनकइति रभसात् स्वत्रितियो
पि॥ वासा गृह अवस्थाने वासा स्यादटरूषकइति रुद्रश्च॥ दीर्घादिश्च॰ वासा वृष आटरूष
सिंहास्या विति हृदयदीपकः॥ ऊषरः क्षारमृत्तिका॥ दृषद्भेदः पाषाणभेदः॥ अश्मभित् २१
षवट्टिं ध्येरक्तपुष्पः सुगंधिकइति॥ ॥ ॥

शाल्मूकइति॰ खदिरोदंतधावनः॥ अरत्नुर्हिंसुकः॥ पिंडीतकोमदनफलं॥ राठकोंगुलिखिल्वै

कपत्रपत्रोह्यनूपजः॥ विटपोमदनंतस्यफलमेवोपयुज्यतइति॥ फलंजातीफलं॥ पद्मादिकं

दः॥ पद्मादिमूलंशाल्मूकंकरहाटःकुरंटकमितिकेयदेवः॥ सौगंधिकंतुकल्हारमिमाधु

पत्रस्यशाल्मूकमेषांकंदःस्यादित्यमरश्च॥ पुल्लिंगोपि॰ शाल्मूकोजलकंदइतिहृदयदीप

शाल्मूकःखदिरेरत्नौ॥ पिंडीतकेपि॰ शाल्मूकंफलपद्मादिकन्दयोः॥ सर्जिका

खर्जिकाक्षारेसर्जकोसनशालयोः॥ अजकर्णीसिंहिकातुचन्द्रपुष्पाटरूषयोः॥

कः॥ सर्जिकेति॰ खर्जिकाक्षारःसुवर्चिका॥ असनोबीजकः॥ शालःसर्जः॥ प्राकुःशालेस

र्जेचिस्तूयइतिहलायुधः॥ शालःसर्जःसर्जोरसःकोतोमरिचपत्रकइतिकेयदेवः॥ अजक

र्णःशालप्रभेदः॥ सर्जकोन्योजकर्णःस्याल्लोलोपरिचपत्रकइतिभावमिश्रः॥ सिंहिकेति॰

चंद्रपुष्पासितपुष्पाकंटकारी॥ सितसिंहीचंद्रपुष्पाक्षुद्रमाताप्रियंकरीतिकेयदेवः॥ सिंहीवृ

हत्यांश्वेतायांप्रभावास्यधिकाचसेतिकश्चित्॥ आटरूषोवासा॥

अश्मंतकइति॰ अम्लोलोलिकाचांगेरी॥ युग्मपत्रः पापहरः॥ अश्मंतको युग्मपत्रः कुशाली
चाम्लपत्रकः अश्मयोनिः पापहरः श्लक्ष्णत्वक् मालुकाछदइतिकैयदेवः॥ स्यादश्मंतकमुद्धा
नेमालुकाछदनेपि चेति मेदिनी॥ उद्दाने चुल्ली॥ अंगारिकेति॰ दीर्घपत्रकांडः इक्षुकांडः॥ कि
शुककोरकः किंशुककलिका॥ कुरंटकः पीतपुष्पसहचरः॥ सैर्यके त्रितयं तुल्यं समिलं

कच॥ अश्मन्तकः पुमानम्ललोलिकायुग्मपत्रयोः॥ अङ्गारिका दी
र्घपत्रकांडे किंशुककोरके॥ कुरण्टके पुमानेकेषिकापाठः सुवेलयोः॥

टकपत्रकैः॥ भेदः पुष्पपुते पीतरक्ताभ्वेताः सुगुल्मकाइति॥ एकैषिकेति॰ पाठापापचेली
॥ पाठातु स्यात्सापचेली अस्थिर वमतामिनी॥ विष्णुक्रांतोपमा पीलुफला मधुरपिच्छिलेति॥
सुषल्लत्रिवृत॥ सुषेणातु त्रिवृद् धसहास्यारक्ता च वर्णतः॥ श्यामातितीक्ष्णा तन्मूले छिन्ने २२
दुचविमोचनी॥ मूलेषु प्रतिमूलानि रोकी स्यपन्नर्भवंति चेति॥ ॥ ॥

कठिञ्जरक इति॰ पर्णासः कुठिंजरः॥ क्षुद्रपत्रोऽर्जकः कुंठोत्थे कुंठस्तु कुठेरकः॥ पर्णासोऽन्यो
विल्वगंधः श्वेतपर्णः कुठिंजरः॥ वटपत्रो गंधपत्रः कपित्थोऽर्जकस्त्वपीति केयदेवः॥ बब
रीति लोके ख्यातः। कुठेरसुमुखौ तुल्यौ तत्र लकौ मंजरीयुतौ॥ स्थिरौ सुगंधी तीक्ष्णौ च तयोर्भे
दः सिताः सितात्॥ उभावन्यौ ताद्दृशौ तु सगंधावल्पभित्समाद्इति॥ अत्र वर्षाभूः॥ अ
परा सुद्रवर्षाभूरक्तपुष्पा शिवाटिका॥ कठिञ्जरको वर्षकेतुः क्रूरकोरक्तदंतक इति केयदे

कठिञ्जरकस्तु पर्णासवर्षाभ्वोकारवेल्लके॥

वः॥ पुनर्वाः प्रसिद्धा रक्तपूर्वाभूस्त्वाप्य धोरुणा॥ अन्याचाद्दला भूस्था विषकर्परसंज्ञि
ता॥ पुनर्नवः पृथुदलो ह्रस्वमारूह्य चोर्द्धगः॥ पूर्वाभूस्त्वारुणसुमा श्वेताख्या सा महागुणेति
वाग्भटाचार्यः॥ खंवपत्राभवेद्दृष्टश्री रक्तपत्रस्तु खर्परः। सटी विस्तीर्णे वह्नीस्यात्सितपु
ष्पा पुनर्नवेति केचित्॥ कारवेल्लं कांडकटुककारवेल्लो समवल्लमौ किं विच्छेलफला परा॥ नि

गुणा चात्र लाद्दे हि स्थिरे रल्पगतेष्वभेद इति॥॥

शिवप्र० कर्कोटिकेति॰ मनोज्ञा विषकंटका॥ वंध्या चेति केयदेवः॥ कर्कोटी द्विविधा अवंध्या वंध्या च॥ क
२२ र्कोटी कंटिनी वल्ली प्रसिद्धान्या फलासुमा॥ प्रतिपत्रं वंध्यकोषाच ध्यायां सा विषाहेयेति॥
कर्कोटिका कर्कटरजः कुलस्थेति विदेहेष वल्लभा॥ केचित्कर्कोटिकी त्याहुः। विल्वशांडिल्यः
॥ त्रिपत्रः कंटकी विल्वी प्रसिद्धः श्रीफलं द्रुमः इति॥ कर्कटकः कादंबेयप्रभेदे श्रीफले पि चेति लो
चनः॥ कालीयकमिति॰ कठिनी दारुनिशा॥ प्रनिर्दिष्टा वेकठिनी सच कालेयकः स्मृतः॥ काली

कर्कोटिका मनोज्ञायां विल्वे कर्कोटिकः पुमान्। कालीयकं कठिन्यां न स्त्री ह
रिचन्दने क्लीवं॥ काष्ठीलिकानुयोषिति वनजायां वनजरं भायाम्॥ ॥

यको दारुनिशेति रुद्रः॥ हरिचंदनं पीतसारं॥ कालीयकं च पीतं स्यात्तथा नारायणप्रियं॥ का
लेयकं पीतसारं पीताभं हरिचंदनमिति धन्वंतरिः। काष्ठीलिकेति॰ वनजा मुद्गपर्णी॥ मुद्गो गो २२
धा शिंबि पर्णी वनजा शिंबि रिंगिलीति केयदेवः॥ मुद्गपर्णी यथा थेव शरपुंखाभगुल्मकः॥
शंबी क्षीरी च तत्सुब्धेति॥ वनजरंभा अरण्यकदली॥ कथ्यो सबहीजफला काष्ठीला जायते व

मतः कुरवक इति॰ अम्लानभित्त ॥ अम्लानस्तु महासहा । तत्र शोणे कुरवक इत्यमरः ॥ तत्र अम्ला
ने॰ शोणे रक्तवर्णे । कुत्सितः ईषद्वा ऽऽ भीनो मत्स्यो मकरंदस्वादे ऽत्रकपि कुरवकः । तथा कुरवके रे
फो निरुकारो ऽपियुज्यते इति द्विरूपकोशः ॥ कुरवकार वकारणातोय पुरितिरघुः ॥ ईषद्ईति भेगे
संज्ञायां कुन्॰ उवङ् ॥ उकारद्वयवानितिमुकुटः । किरातिके कुरु कुरवक चिंता चितामिति वा
णभट्टः ॥ झिंटीभित्त॰ सैरेयकस्तु झिंटीस्यादित्यमरः ॥ तस्मिन् कुरवको ऽरुणरुणइति च ॥ तस्मि
न् सैरेयके । सैरेयक सहचरः सैरेयश्च सहाचरः ॥ पीतारक्तो ऽथ नीलश्च कुसुमेस्तं विभावयेत

मतः कुरवको ऽम्लान झिंटी षट्पदिकाभित्तुच ॥ कुरणकः कुन्द पीताम्लान झिंटीकपीत
ने । कोशातकी परोम्याच । घोषकश्चेऽवेधथो ॥

ऽपीनः कुरंटको ज्ञेयो रक्तः कुरवकः स्मृ
तः । नीलश्च आर्त्तगलो दासी वाणओदन पाकपीति ॥ षट्पदिकाभित्त॰ गौरो महान् कुरवकः प्रमोदो ऽथ वान
पुष्पकः । मुकुंदः कालवः पीतः केदारस्तु र्णकांगुको । इत्याद्याः षट्पदिका इति केशवः । तत्र कुरव
कः । कुरवक कुसुमाकारस्य कइति सिद्धमेत्रप्रकाशः ॥ कुरणकइति॰ कुरशब्दे । वाकुलकादंट
: । स्वार्थे कन् ॥ ह्रस्वे ककारवान् कुंदो माध्यः कुरंटक इतिरत्नकोषः । कुंदस्तु शीतो धोरणकें
सुममिति ॥ पीताम्लानः पीत महासहा ॥ तत्र पीतकुरंटक इत्यमरः ॥ तत्राम्लाने पीते पीन पुष्पे ॥
सामान्येनाम्लानमात्रेपि कुरंटकः ॥ स्यादम्लानः कुरंटक इति त्रिकांडशेषः ॥ किंकिरातमुरंतंकु

गवेधुकमिति॰ गौरिकं धातुः ॥ तृणधान्यं गोजिह्वाख्यं ॥ गोधूमः सुमनः ॥ बला महाबला ॥ बला
मरुत्पुट्टी घोषां गुल्मिपत्रा सकंटका ॥ विरूपः पिच्छिलो वाट्येव स्यान्मुरव्या तु सा मता ॥ महाब
ला सहदेई इति च लोके ॥ अत्र बलाभिरूढा प्राह्यलकः ॥ खिरहठीति लोके ॥ तदभावे स्फुरद्व
लारियत्वात् तलकाबकुरिति ॥ तदभावे महाबलाभावे ॥ गांगेरुकीति॰ कार्णा नागबला ॥

॥ गवेधुकं गैरिके च तृणधान्ये गवेधुकः ॥ गोधूमे॰ गवेधुका नु बलायां
च बलाभिदि ॥ गाङ्गेरुकी तु कार्नायां स्त्री वं तु स्मग लिलुके। गोमेदकं पीतर
त्नेका कोलपत्रके पिच ॥ ॥

गांगेरुकी विश्वदेवा कार्णा नागबलेति वैद्यदेवः ॥ गांगेरुकी नागबला गुच्छपत्रा गिरौद्भवेति ॥ म
गस्त्रिडकं गांगेरुकीफलमिति नान्यदेवः ॥ गोमेदकमिति॰ ॥ पीतरत्नं पीतमणिः ॥ गोमूत्रवर्णं २४
॥ पीतं चारुणिमा स्युतं गोमेद इति ॥ काकोलो विषं ॥ पत्रकं तमालपत्रम् ॥ ॥ ॥

तिक्तशाक इति॰ वरुणो वरणः सेतुस्तिक्तशाकः कुमारक इत्यमरः॥ वरुणः पादपरिस्तिक्तस्त्रिपर्णो
भ्रमरप्रियः॥ वृहज्जं वृदलो हृत्तपत्रतुल्यफलः सुमे॥ कषायः श्वेतश्चेति॥ खदिरो वालपत्रः॥ पत्र
सुंदरः शाकभेदः॥ त्रिवस्तुकमिति॰ गोक्षुरकस्त्रिकंटः॥ त्रिफलाउत्तमा॥ कटुत्रिकं शुंठी मरिचपिप्प
ल्यः॥ त्रिगंधं त्वकूपत्रैलं॥ तिन्तिडीकमिति॰ वृक्षाम्लं रक्तपूरकं॥ वृक्षाम्लं तिंतिडीकं च साम्ल

तिक्तशाकस्तु वरुणे खदिरे पत्रसुन्दरे। त्रिवस्तुकं गोक्षुरके त्रिफलायां कटुत्रिके। त्रिगन्धे तिन्तिडीकं
तु नना वृक्षाम्लचिञ्चयोः। दलाढकः स्वयंजाततिले च करिकेसरे। शिरीषे गैरिके कुन्दे ना फलिञ्जे तु यो
षिति॥ ॥

कं रक्तपूरकमिति धर्मदासः॥ चिंचा वक्रफला॥ दलाढक इति॰ स्वयंजाततिलो वन्यतिलः॥ ज
र्तिला परपर्याया॥ करिकेसरो नागकेसरः। शिरीषो भंडी॥ गैरिकं धातुः॥ कुंदो माध्यः॥ फलि
ञ्जो मरूकः॥ फलिञ्जकस्त्रीश्यागंधो मंजरी को दलाढकेति केयदेवः॥ मरूकस्तु गणकस्त्वनुरि
ति॥ ॥

पिंडीतकइति॰मरुवकःफलिक्षकः॥पिंडीतकः फलिन्नके॥तगरे मदनद्रौचेतिहैमः॥पिंडीतकोमरुवको
मरूकश्चफाणिज्ञकइतिधर्मदासः॥तगरंवक्रं॥वक्रेशकावनो॥उत्तरेचारिदलकंसुगंधिसलिलोति
कं॥त्नणकंचेति॥मल्लोराठः॥पुंडरीकमिति॰सितांभोजंश्वेतपद्मं॥वालुकाख्यविषंविषभेदाः।
अहिछत्रोमेषशृंगःकुष्ठवालुकनंदनाः॥मुस्तकोदारवाद्याश्चस्युवराविषजातयइतिहैमः॥

॥पिण्डीतकोमरुवकेतगरेमदनद्रुमे॥पुण्डरीकंसितांभोजे २२
वालुकाख्यविषान्तरे सहकारफलेनातुदमनेशालिभिद्यपि॥ २३

सहकारफलमतिसुरभ्याम्रफलं॥वसंतद्रुतमाकंदसाहारपिकबंधवः॥सहकारेस्यतुफलंपुंडरी
कमितीरितमितिसिंहः॥दमनःपुष्पचामरःसर्वांगसुरभिःपुष्पादिवर्जितश्च॥साहजिकरूपवत्या
वपुषिभवत्याविभूषणंभारः॥सर्वांगसौरभिरायादमनव०न्माःकिमालिकुसुमेनेतिकश्चित्॥
अत्रशालिभित्पुंडरीककुसुमाकारश्शूकः शालिः॥पुंड्रः पांडुः पुंडरीकः प्रमोदोगौरशालिकइति

भण्डीरिकेति॰ लोहितामंजिष्ठा॥ तंडुलीयकमिदमेघनादः॥ चौलाईतिलोके॥ भिरिंटिकेति॰ पय
स्याभित्वत्प्रदुग्धिकाकर्णी गुंजा॥ मरुवकइति॰ पुष्पभेदः मरुवकनाम्नैवविख्यातः॥ करघाटः
फलं॥ करघाटेमरुवकः पिंडीपिंडीतकः फलमिति केपदेवः॥ फणिज्जोमरूकः॥ मदनद्रौमरुवकः पुष्प

भण्डीरिकालोहितायांतण्डुलीयकमित्यपि॥ भिरिण्टिकापयस्याभित्काकणन्त्योश्चयो
षिति॥ मरुवकः पुष्पभेदे करघाट फणिज्जयोः॥ मयूरकः शेखरिकेशिखिग्रीवेपिदीप्यके॥

भेदेफणिज्जकेइतिलोचनः॥ मयूरकइति॰ शेखरिकः किलिही॥ अपामार्गस्तलकवत्स्सिद्धेदु
र्मजरिः स्थिरः॥ दिग्धफलकश्चेति॥ शिखिग्रीवंतुत्थं॥ तुत्थंवितुन्नकंचापिशिखिग्रीवंमयूरक
मितिधर्म्मदासः॥ नाम्नाकिदंतुन्नकंतुत्थमितिदीप्यकोऽजमोदा॥ ॥ ॥

मधूलकइति० अजालमद्यं अपरिणतंमद्यं ॥ सर्वमद्यमसंजातंमधूलकइतिस्मृतमितिकेयदेवः ॥ दी
र्घपत्रोगिरिमधूकः ॥ गिरिजेत्रमधूलकइत्यमरः ॥ गिरिजइत्येवपाठः साधीयानितिसुभूत्यादयः
॥ गौरशाकोमधूकोन्योगिरिजःसाल्पपत्रकइतिमाधवः ॥ स्वामीतुजलजइत्याह ॥ मधूकोन्योम
धूलस्तुजलजोदीर्घपत्रकइतिनिःश्रूकदीर्घगोधूमःसूक्ष्मोनंदीमुखीतथा ॥ मधूलिकाचेति
केयदेवः ॥ अंभोजाजलयष्टीमधु ॥ यष्ट्याह्वंमधुकंयष्टीवाम्भोजामधूलिकेतिहृदयदीपकः ॥

मधूलकोजालमद्ये दीर्घपत्रेमधूलिका ॥ निःश्रूकदीर्घगोधूमा
म्भोजामधुरसासुच । मुरङ्गिकाकाकनासादेवश्रेणीमभञ्जने ॥ ॥

मधुरसामुर्वामधुरसादेवीमधुपर्णीमधूलिकेतिधन्वंतरिः ॥ मूर्वासपीलुर्वीरुच्चस्वादुहिंस्रासु
माध्रुवेति ॥ मुरंगिकेति० ॥ काकनासातुकाकास्याञ्जीवनीयामुरंगिकेतिकेयदेवः ॥ देवश्रेणी
मूर्वा ॥ मूर्वामुरंगिकादेवीदेवश्रेणीपृथक्त्वचेतिकेयदेवः ॥ सुभंजनःशोभांजनः ॥ ॥

मृणालकमिति॰ वीरतरं वीरणमूलिका॥ वक्रमूलं वीरतरमम्मृणालं मृणालकमिति धर्मदासः॥
उशीरं वीरिणीजटा॥ कशावत्साह्वणानृपेष्विरेति॥ पद्मनालं पद्मदंडः॥ वितुन्नकमिति॰ कुस्तुंबरी॰ ध
निका धानिका धानी धान्यं धानी वितुन्नकमिति केयदेवः॥ भद्रमुस्तं नागरमुस्त॥ विषकूपर्णी भूधा
त्री॥ वितुन्नका जटामांसी विषघ्नपर्णी शुभा किनीति केयदेवः॥ पांडुः सिद्धा विटा धात्री भूपूर्वा दलस
स्विनीति॥ वितुन्नकं च धान्याके ऽटामांसी नामयूरक इति विश्वः॥ मयूरकं तुत्थं॥ तुत्थं वितुन्नकं चा
पि शिखिग्रीवं मयूरकमिति धर्मदासः॥ विषाणिकेति॰ मेषश्रृंगी चर्मरंगा॥ श्रीवृक्षो मेषश्रृंगी

मृणालकं वीरतरे पद्मनाले वितुन्नकं। कुस्तुम्बरी भद्रमुस्त विषघ्नपर्णी
मयूरके॥ विषाणिका मेषशृंगी काकाली कर्कटाह्वये॥ वृषे तुना॥ ॥

च श्रृंगी च श्रृंगिका॥ वृश्चिकाली मेढ्रश्रृंगी कूर्चपर्णी विषाणिकेति केयदेवः॥ मेढ्रिआउष्टिरतिगू
ञ्जराः॥ सन्नाऽमधुकूर्ई इतियाश्चास्याः॥ आवर्तगुल्मका पीतपुष्पा शंखा त्रिधा च सा॥ पंक्तिपत्राः प्र
सिद्धास्तामेढावल्या दयोत्रविति॥ काकोली॰ मधुराजीवनीया च सा मतेति धन्वंतरिः॥ कर्कटाह्व
यं॥ श्रृंगी च कुलिंगी कर्कटाह्वायमिति धन्वंतरिः॥ अथ श्रृंगिका॥ कर्कटाख्याऽरिपत्राग्राः पाद
पास मिश्राश्रयाः॥ ग्रंथयः कर्कटास्तस्य श्रृंगालीति॥ वृषे वासा॥ ॥ ॥ ॥ ॥

शीतपाकीति० वल्लावाट्यालकः॥ रक्तिकागुंजा॥ सोमवल्क इति० कटुफलं कट्फलं॥ कदरः
सितखदिरः॥ कदरः खदिरेसिते। सोमवल्कोपीत्यमरः॥ घृतपूरकः करंजः॥ सौगंधिकमि
ति० रुचकं सौवर्चलं॥ सौवर्चलं स्याद्गंधं सुगंधं रुचकं स्मृतं॥ सौगंधिकं च जरणमस्त्रमिति के
यदेवः॥ कह्लारं संध्यादिकासि पद्मिनीपुष्पं। रूपधूपनं हिंगु॥ देवजग्धं रौहिषं। कत्तृणं रौहि
देवजग्धं सौगंधिकं तथेति भावमिश्रः॥ पद्मरागः शोणमणिः॥ लेलीतको गंधपाषाणः॥

शीतपाकी वल्लारक्तिकयोः स्त्रियाम्॥ सोमवल्कः कटुफले कदरे घृतपूरके॥ सौगन्धिकं
तु रुचके॥ कह्लारे रूपधूपने। देवजग्धे पद्मरागे लीबे लेलीतके पुमान्॥ कपम्॥ अथेक्षु
वालिका काशे क्षुरके च क्षुभिद्यपि॥ ॥

गंधकस्ते लेलीतकौ गंधः॥ वैगंधिक सौगंधिकगंधोपलगंधपाषाण इति हृदयदीपकः॥ कपम्॥
अथेक्षुवालिकेति० काशः॥ इक्षुकांडो वायसेक्षुः सुकांडश्च क्षुवालिकेति केयदेवः॥ क्षुरकः॥ को
किलाक्षो भिक्षुरिक्षुवालिका तिलकंटक इति केयदेवः॥ इक्षुभित् पौण्ड्रकः कांतारेक्षुवालिकेक्षु
गंधा नेपाल शतपर्वक कृष्णपर्वक वांशिक नीलयष्टिकाद्या इक्षुजातयः शरेक्षु कुशकाशाश्च
शालयश्च प्रसिद्धकाः॥ वंशो दूर्वा च दोला च विशावर्गस्य पंचकमिति॥ ॥ ॥ २७

स्यात्क्रिमिकंटकमिति॰ चित्राद्दंती॥ विडंगः क्रिमिशत्रुः॥ उदुंबरो जंतुमत्फलः॥ विषयकप्रसिद्धान्यग्रो
धोदुंबरप्लक्षपिप्पलाः॥ क्षीरितरव इति॥ भवेज्जलकरं क इति॰ पुरोदकपलं नालिकेरफलं।
स्त्री लांगली लांगलं च त्रिनेत्रो मल्लुणो जटी॥ हलीपुरोदकः कूर्चकेसरश्च कलिंगकः॥ फलं जलकर
केऽस्येति सिंहः॥ अंबुदो मुस्ता॥ कंबुः शंखः॥ शुक्तिः शंखिनिकाशंखोवराटश्चाप्यनेकधा॥ सिंधु
जाश्च सरोजाश्च चक्षुष्यत्वादिहोदितास्ति॥ जलनलताजलनीली॥ अथ प्रतिविष्णुक इति॰॥

स्यात्क्रिमिकण्टकं चित्राविडङ्गोदुम्बरे पुंच॥ भवेज्जलकरङ्कस्तु पुरोदकफले
म्बुदे॥ कम्बोजलनलतायां च पुंस्यथ प्रतिविष्णुकः॥ क्षीरिण्यां मुचकुन्देपि स्यात्॥

क्षीरिणी॰ क्षीरी राजादनतरुः॥ अन्यः क्षीरी क्षीरिणी॥ राजाद्धः क्षीरभद्रः क्षीरीति केयदेवः॥ स्त्रीव
पुंसोरपि स्त्रीत्वं ह्याप्यत्वत्वविवक्ष्ययेति मेदिनी॥ मुचिलिन्दो मदनको राजन्यः क्षत्रपादपः॥ इक्ष्वाकु
: श्रीः क्षीरफलश्चिवुकः प्रतिविष्णुक इति केयदेवः॥ मुचकुंदः क्षत्रवृक्षश्चिवुकः प्रतिविष्णुक
इति भावमिश्रः। प्रलेपादिना शिरोर्त्तिहारी दीर्घवाद्दलपीतसुमः पुष्पमात्रोपयोगी मुचकु
न्दनाम्नैव प्रसिद्धः॥ ॥

अथ व्रीहिराजक इति० कंगुधान्य चीनाकधान्ये तृणधान्यवर्गे प्रसिद्धे ॥ शतपर्वक इति० वेणुर्वंशः ॥
इक्षुभित् शतपर्वक नाम्नैव ख्यातः ॥ शतपर्वक कांतारनेपालाद्यास्ततः क्रमादिति वाग्भटाचार्य
ः ॥ षड्ग्रंथा वचा ॥ अथ वचान्यैषु गाकदुः ॥ तन्विक्षुपत्राभूवाल्लुमध्यमस्था पर्विणीपृथुः ।
अपुष्पफलिका चेति ॥ नीलदूर्वा शाद्वलं ॥ नीलदूर्वा स्मृता शष्पः शाद्वलं हरितस्तथा । शतपर्वा

अथ व्रीहिराजकः ॥ कङ्गुधान्ये च चीनाकधान्ये स्याच्छतपर्वकः ॥ वेणौ विक्षुभिदि
स्त्री तु षड्ग्रन्थानीलदूर्वयोः ॥ स्वादुकण्टकइत्येष क्षुरे कोल्यां विकङ्कते ॥ ॥

शीतवीर्यशीतवल्कस्सितोष्णेति धन्वंतरिः ॥ स्वादुकंटक इति० क्षुरो गोक्षुरः ॥ गोक्षुरः स्या
न्गोक्षुरको भक्षटः स्वादुकंटक इति धन्वंतरिः ॥ क्षुरः कोकिलाक्षे च गोक्षुरे इति विश्वः ॥ को
लीबदरी ॥ कोलीकंटकिनी सिद्धा बदरं तत्फलं च तत्र । द्वयं प्रसिद्धं च तयोर्लघुसूक्ष्मं च सद्गुण
म् ॥ कर्कंधुर्महतीत्यत्रेति ॥ विकंकतो यज्ञपादपः । विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपी
त्यमरः ॥ वृक्षकंटकारिकेति डल्हणः ॥

स्याद्धेमपुष्पिकेति ॰ यूथीवाजपुष्पासाचात्रपीतावोध्यास्वर्णवर्णपुष्पत्वात् ॥ चंपकोगंधफ
ली ॥ कषट् ॥ प्राह्णषायणिकेति ॰ यूथीवालपुष्पा ॥ कंडूराकपिकच्छूः ॥ जटिलामांसी ॥ मांसीमा
ताभूतकेशीनलदंजटिलाजटा । सुलोमशामखीहिस्त्रोत्र आदीपिन्नीनी शिखेति केयदेवः ॥
अथविछिन्नदलः श्वेतः सुलोमशः ॥ मृदुः सुगंधिरत्नण्णकोदलतोगुछकोपिचेति ॥ मुखशो
धनकमिति ॰ भव्यंकर्मरंगफलं ॥ भवंभव्यंभविष्यंचभावनंमुखशोधनमितिकेयदेवः ॥

स्याद्धेमपुष्पिकायूथ्यांचम्पके हेमपुष्पकः ॥ कषट् ॥ प्राह्णषायणिकायूथीकण्डू
राजटिलासुच ॥ मुखशोधनकंभव्येनागवल्लीदलेस्त्रिवे । मुखमण्डनकोधूम्रवर्णेचतिल
कुसुमे ॥ ॥

ग्रंथिलंप्राकृपवकाभद्रलोम्लमधुरोविटः ॥ पलमात्रंसितंपद्ममिति ॥ नाग
वल्लीदलंतांवूलीदलं ॥ लवंलवंगं ॥ लवंगंदेवकुसुमंभृंगारंशिखरंलवमितिकेयदेवः ॥ वल्ली
लवंगकानागवल्लीवसितपुष्पिका । गंधिनीचेति । मुखमंडनकइति ॰ धूम्रवर्णस्तुरुष्कः ॥ तु
रुष्कः सिल्हकोधूम्रोधूम्रवर्णश्चलः कपिरितिकेयदेवः ॥ गांधिकद्रव्यं ॥ तिलकद्रुमः श्रीमान्
॥ तिलकः क्षुद्रकः श्रीमानचित्रकोमुखमण्डनइतिधन्वंतरिः ॥ ॥

शिवप्र० हिंगुनिर्यासक इति० पारिभद्रो निंबः ॥ अरिष्टः सर्वतोभद्रः सुभद्रः पारिभद्रकः ॥ छर्दिघ्नो हिं
२९ गुनिर्यासः प्रियशालोर विप्रियइतिधन्वंतरिः ॥ हिंगुस्सूपधूपनं ॥ कान्ताः ॥ खन्डि ॥ शङ्खइति०
नखः शुक्तिः ॥ शंखः शफः खुरः शुक्तिः ॥ शिल्पी नागहनुर्हनुरिति केयदेवः ॥ नखद्वयसमुद्र
स्थाजंतवो निहताः शंके ः ! हहंतो लघवो द्विधापन्नखाभा नखाइतिति ॥ कंबुर्वारिचरः ॥ शंखो
वारिचरः कंबुर्जलजो दीर्घनिस्वन इतिधर्मदासः ॥ शिखेति० मांसीमाताभूतकेशी क्रव्यादी

हिंगुनिर्यासकः पारिभद्रोऽस्त्रीवंतु हिंगुनि ॥ कान्ताः ॥ खन्डि ॥ शङ्खोऽस्त्रियांनखे
कम्बौ शिखामांसीविशल्ययोः ॥ सुखमेङ्गाव हृद्यो चवालकेतुनपुंसकम् ॥ ॥

पिशिनी शिखेति धर्मिष्ठः ॥ विशल्याकलिकारीवन्हिमुखी प्रदीप्ताग्निशिखा शिखेति केयदेवः ॥
लांगली तरणका के दिन्यरुणो रुसुमासिता ॥ आर्द्रकानुदलाचेति ॥ सुखमिति० ऋद्धिर्वृद्धिर्युगं तु
श्रीराशी : सर्वजनप्रिया ॥ ऋषिसृष्टासुखं चाथ वृद्धिरप्याढ्या अमी इति केयदेवः ॥ ऋद्धिर्वृद्धी
प्रतानिन्यो निंबजीवंति कादले ॥ स्वादुसाधारणे वृद्धिः श्रीरिलपाद्यापिपिच्छिलेति ॥ ऋद्धिर्द्वे
क्षिला कर्त्त वृद्धिर्वमावर्त्ता इति चकश्चित् ॥ वालकं वारि । सिद्धो चांबुदवालकाविति ॥ ॥ २९

खच॥अग्निशिखेति॰कलिकारी लांगली। कुंकुमं वाह्लीकं॥कुसुम्भं वस्त्ररंजनं।अथाग्निशिखमुद्दिष्टं कुसुंभे कुंकुमेपि चेति मेदिनी॥अग्निमुखीति जहृग्नातोरुष्करः।।गर्भपातिनी कलिकारी॥इंदुलेखेति-सोमलतासोमवल्ली॥सोमवल्ली धन्वतरूर्यज्ञनेता द्विजप्रिया॥पक्षपत्त्रो॰ महार्घोऽन्यो महागुल्मो मखप्रभुः॥श्येनाहृतस्तस्य भेदा विंशतिस्थुतुरूनरारतिकेपद्वः॥गुडूचीवत्साद

खच॥अग्निशिखाकलिकार्य्यामग्निशिखं कुङ्कुमे कुसुम्भे च॥अग्निमुखीनल्लीवं भल्लातेस्त्रीतुगर्भपातिन्याम्॥इन्दुलेखासोमलतगुडूचीवाकुचीषु च॥नन्दीमुखीतु कर्पासं स्वल्पगोधूमभिद्यपि॥खान्नाः।गद्धि॥तुङ्गीनिशावर्वर्यास्तुतुङ्गं पद्मस्य केसरे॥तुङ्गाय वित्रपत्त्रा पांतुङ्गश्चोचे च केसरे॥ ॥

ऽनी॥वाकुचीमल्लिना॥नन्दीमुखीति-कर्पासस्याच्छादनफला॥स्वल्पगोधूमभित्स्पष्टं खान्नाः।।गद्धि॥तुङ्गीति-निशाहरिद्रा॥वर्वराकवरी॥पद्मकेसरः पद्मविंजल्कः॥पंद्मशारदिदृश्यतेऽस्ति॥पवित्रपत्त्राशमी॥प्रसिद्धैव शमीतरुरिति॥चोचं लांगली॥केसरः करिकेसरः॥ ॥छ॥

नागइति० तालो ध्वजद्रुमः॥ भद्रमुस्तं नागरमुस्ता॥ पुन्नागः काष्ठचंपकः॥ नागकेसरः करिकेसरः॥
पुत्रजननी लक्ष्मणा॥ लक्ष्मणा तु जलाभ्यर्णे वह्नी नाडी दलाद्दले॥ शोणाना कृतिधृक् स्वादुः क्षीरि
णी मृदु शोषिरेति॥ भावमिश्रस्तु पुत्रकाकारस्फाल्य विंदुभिर्लांछितासदा॥ लक्ष्मणा पुत्रजन
नी वस्तगंधाकृतिर्भवेदिति॥ सीसकं त्रुतरूपं वं महाभारं छेदे कृष्णसमुज्वलं॥ पूतिगंधं वहिः कृष्णं
शुद्धं सीसमतोन्यथा॥ अशुद्धमिति॥ रंगं वंगं॥ खुरकं मिश्रकं चेति द्विविधं वंगमुच्यते॥ खुरं त

नागस्तालेभद्रमुस्ते पुंन्नागे नागकेसरे॥ नागा पुत्रजनन्यां च नागं सीसकरंग्योः॥ पिंगं तु वालकेपि
ङ्गीशाम्यां पिङ्गा तु रामठे॥ रोचनायां हरिद्रायां पूगः क्रमुकतूदयोः॥ भृङ्गं नखे त्वचायां भृङ्गो भृङ्गा
रके॥

त्रगुणेः श्रेष्ठं मिश्रकं नहितं मतमिति॥ पिङ्गमिति० वालकं ह्रीवेरं शमीपवित्रपत्रा॥ रामठं हिंगु॥
रोचना गोरोचना॥ हरिद्रा निशा॥ पूगइति० क्रमुकः घोंटा॥ तूदं ब्रह्मनिष्ठं॥ भृंगमिति० नखः व्याघ्र
नखः॥ त्वचा त्वक्॥ भृंगारको भृंगः॥ भृंगारको भृंगराजो भृंगारो भृंगएव चेति धर्मिष्ठः॥ ये ३०
मासमेकमपि वंति चूर्णं दिने दिने भृंगरजः समुत्थमिति सांनोपि॥ कृष्णस्वरसकः पारांकुलिप
त्रावदुस्तृणः॥ भृंगः प्रसिद्धो गंधोत्पत्तिकः कर्कशाकः स्थिरः॥ तन्त्वगुलिदल इति॥ ॥ ॥

मार्ग इति॰ आघाटः किणही मार्ग इति केयदेवः ॥ मृगनाभिर्मृगमदो मृगाण्डः कस्तूरिकापि चेति माधवः ॥
मृगाः भृङ्गास्तवङ्गोटनिर्विषाणं क्रिसंधयः ॥ तेषां नाभिस्तु कस्तूरी सिद्धेति ॥ युगमिति॰ ऋद्धि वृद्धी ऋ
षिसृष्टे ॥ वङ्गमिति॰ सीसकं भुजंगं ॥ रंगं त्रपु ॥ वयनीफलं कर्पासः ॥ वार्त्ताकः वार्तिंगणः ॥ अथ वेगद्
ति॰ महाकालफलं शंपाकः ॥ मेघनादः चौलाई इति लोके ख्यातः ॥ अथ शुण्ठीति॰ आम्रातो मन्मथो
द्भवनः ॥ वटो रक्तफलः ॥ पिप्पलश्चलदलः ॥ पर्कटी पाकलिः ॥ पर्कटी प्लक्षपाकल्पोरितिविश्वः ॥

मार्गः ॥ आघाटे मृगनाभौ युगं तु ऋद्धौ च वृद्धौ च ॥ वङ्गं तु सीसके रङ्गे वङ्गस्तु वयनीफले ॥
वार्त्ताक्यप्यथ वेगस्तु महाकालफलेऽपि च ॥ मेघनादेऽथ शुण्ठी स्यादाम्रातवटपिप्पलेपर्क
ट्यां चाथ शृङ्गो नाभस्तृणे जीवके स्त्रियाम् ॥ विषर्षभस्त्रिवामषभ्यांकर्कटकी षु च ॥ गान्त्रि ॥

चनः ॥ अथ शृंग इति॰ भूस्तृणं मालातृणे ॥ मालातृणं भूस्तृणं द्वे शतपुष्पोग्रगंधिनीति सिंहः ॥
जीवकः ह्रस्वांगः ॥ शृंगो ह्रस्वांगजीवकावित्यमरः ॥ ऋषभो वृषपर्णोस्तु काष्ठीक्षीरीविटो स्थिर इति ॥
विषा अतिविषा ॥ सितासितारुणैः श्वेते द्रवित्रिविषं तत्के गिरावितिना ऋषभो दुर्धरः ॥ ऋषभेति विषायां
च शृंगी मधुरवल्लभेसुभयत्रलज्ञानयो ॥ शिवा हरीतकी ॥ वासादलो द्रुमो द्रिसत्कुः फलं तस्य हरीत
की ॥ विषशृंगी वत्सशृंगी ॥ सन्नाइति लोके ॥ कर्कटकी कर्कटशृंगी ॥ गान्त्रि ॥ ॥ ॥ ॥

शिवम० कलिंगइति० लोगलंत्रिनेत्रः॥स्त्रीलोंगलीलोंगलं चत्रिनेत्रोमत्कुणोजटी॥हलीपुरोदकःकू
३१ र्चकेसरश्चकलिंगकइतिसिंहः॥गौरःकरंजः॥कुटजोवत्सकः॥तद्यवरंद्रयवः॥कलिंग
द्रवयवःपुमान्इत्यमरमाला॥कालिंगीति०कर्कारुराजकर्कटीतिकेयदेवः॥खरबूजाइति
लोके॥भूमिकर्कारुःकलिंदकं॥कालिंगोभूमिकर्कारोदन्तावत्सभुजंगयोः॥कालिंगी
३। राजकर्कट्यामितिमेदिनी॥दीर्घातुकर्कटीगोंगीखर्बूजंवर्तुलंहियत्॥रक्तबीजंतल्क

कलिङ्गोलाङ्गलेगौरेकुटजेतद्यवेत्रिषु।कालिङ्गीराजकर्कट्यांभूमिकर्कारुकेऽस्त्रि
याम्॥कुरङ्गीमुद्गपर्ण्यांस्यात्कुरङ्गोमदनद्रुमे।चक्राङ्गीकटुरोहिण्यांमञ्जिष्ठाया
मपिस्त्रियाम्।त्रिवर्गस्तत्रिजातस्यात्त्रिफलायांकटुत्रिके।द्विजाङ्गीकटुकात्रुम्बोः॥

लिंगंकलिंदंफलवर्तुलमितिसिंहः॥कुरङ्गीति०मुद्गपर्णीमृगगंधिका॥मदनद्रुमोराठः॥
चक्राङ्गीति०कटुरोहिणीकट्वी॥मंजिष्ठासमंगा॥त्रिवर्गइति०त्रिजातंत्वक्पत्रैलं॥त्रि
फलाविभीतकामलहरीतक्यः॥त्रिकटुशुंठीमरिचपिप्पल्यः॥द्विजाङ्गीति०॥कटु ३१
कामत्स्यपित्ता॥तुंबीअलाबूः॥ ॥ ॥

नारङ्ग इति॰ पिप्पलीरसः प्रसिद्धः॥ नागरंगस्त्वक्रवासनः॥ नागरंगश्च नारंगो नार्यंगस्त्वक्रवासनः॥ ऐरा
वतश्च सैव स्यात्तनोर्दई भूमिजंबुकेति सिंहः॥ पत्राङ्गमिति॰ पद्मकं पद्मकाष्ठं॥ पद्मकं सूक्ष्मविच्छिन्नव
त्रो ज्ञेयः पाद्यो पफलः॥ कषाय इति॥ रक्तचंदनं पट्टरंजनं॥ रक्तद्रव्ये गंधहीने रक्तचंदनसन्निभे रक्तचंद
नपत्रांगपटुरंगाणि नपुंसक इति सिंहः॥ पत्रांगं न द्वयोर्भूर्जे पद्मके रक्तचंदन इति मेदिनी॥ पतङ्ग रक्त
संज्ञश्च द्वयं रोहितवत्छदमिति॥ भूर्जे लिख्यपत्रः॥ तरुर्भूर्जो लिख्यपत्रे सुमोत्पकफलस्त्वचः॥ भूर्जोऽन्यः

नारङ्गः पिप्पलीरसे॥ नागरङ्गे पिपत्राङ्गं पद्मके रक्तचन्दने॥ भूर्जे परागः॥
सुमनोरेणुपर्पटचन्दने॥ पतङ्गः॥ शालिभेदे क्लीवं पत्तूरस्मृतयोः॥ ॥

स्यात्सारदारुरेकः शालस्तथोऽसिन इति॥ पराग इति॰ सुमनोरेणुः कुसुमरजः॥ मज्जासारो ग्रंथिः परुः॥
परागः कुसुमरेणुरिति पुंस्कांड रत्नकोषः॥ पर्पटो रजः॥ चंदनं श्वेतचंदनं॥ पतङ्ग इति॰ शालिभेदः पतंग
नाम्नैव रव्यातः॥ पतंगाश्चैव तपनीयाश्च ये चान्ये शालयः शुभा इति वाग्भटः॥ कुंकुमापरपर्याय इति
सिद्धमंत्रप्रकाशः॥ अर्कार्कपर्णः॥ पत्तूरं पट्टरंजनं॥ कुचंदनं रक्तकाष्ठं पत्तंगं पट्टरंजनमिति केयदे

सं॥ [illegible] ॥ ॥

प्रियङ्गुः पिति॰ पिप्पली मागधा॥ कंगुस्त्रलघसन्तं॥ राजिका आसुरी॥ फलिनी महेला॥ पुन्नाग इति॰ पाट
लापुष्पो देववल्लभः॥ पुन्नागः पाटलापुष्पः केसरो दिवल्लभ इति धर्मिष्ठवैद्यदेवौ॥ जाती फलं जाति
सस्यं॥ सितोत्पले सितपंकजं॥ वराङ्गमिति॰ त्वक्चोचं॥ कङ्कुष्ठं काककुम्भा मूषिकाभिद्धवंती॥ मुरङ्गी
ति॰ उपोदका पोतकी॰ उपोदकोऽर्द्धगा वल्ली पिच्छिला छदना स्थिरा॥ तृन्नपत्रा रक्तदंडा रस्का वीजं रसा च
सेति॥ काकाचोरस्नायुः॥ मूर्वा मधुरसाः॥ शोभाञ्जनः सुभंजनः॥ तरुणी जनस्याधिगतः शोभांजनो व

प्रियंगुः पिप्पली कङ्गु राजिका फलिनीषु च॥ पुन्नागः पाटलापुष्पजातीफलसितोत्पले॥
वराङ्गं त्वचि कङ्कुष्ठे वराङ्गी मूषिका काकामूर्वा शोभाञ्जनेषु च॥ यज्ञाङ्गः किंशुके दर्
भे तिले दुम्बरपिप्पले॥ यवे सक्तुफलायां च वालुपत्रे पि सर्पिषि॥ रक्ताङ्गो रञ्जने चि
त्रे रक्ताङ्गं विद्रुमे स्त्रजि रक्ताङ्गी जीवनी। जिङ्ग्योः रथाङ्गं नेमियोग्ययोः॥ ॥ ॥ ॥

संतसमयः प्रादुरासीदित्याश्चर्यमंजरी। त्रयोदशस्वराद्यं च शोभांजनउदाहृतमिति द्विरूपकोषः॥ य
ज्ञाङ्ग इति॰ किंशुकः पलाशः॥ दर्भः कुशः॥ तिलसैलफलः॥ उदुंबरो जंतुमत्फलः॥ पिप्पलश्चलद
लः॥ यवः शूकधान्यं॥ सक्तुफला शमी॥ वालपत्रः खदिरः॥ सर्पिर्घृतं॥ रक्ताङ्ग इति॰ रंजनः कंपिल्लः
॥ चित्रको लोहितांगश्च कृतभुक्पावकोऽनल इति धर्मिष्ठः॥ विद्रुमो यावबल्लरी॥ असृक्कुंकुमं॥
जीवनी जीवंती। जिंगी मंजिष्ठा॥ रथाङ्गमिति॰ नेमिस्तिनिद्याः पुल्लिङ्गस्ति निङ्गा नेमिश्चक्रप्रांतस्त्रिया

[illegible] ३२

समङ्गेति॰ रक्तपादानमस्कारी॥ बलावा घालक:॥ मंजिष्ठा जिंगी॥ गच॥ अजशृङ्गीति॰ कर्कटकी
वन्ना॥ मेषशृंगीचर्मरंगा॥ गान्ना:॥ घट्टि॥ लघ्विति॰ लोहमगुरु॥ अगुरुप्रवरंलोहंक्रमिजग्धमनार्य
कं राजार्हंतत्रुमलिनंकालेयंशीर्षकं लघ्वितिके पदेव:॥ अंगुरुकुरुत्तुष्ठंगुलिछदन: सुमं॥ अल्पंनच
फलं वा ष्ठं जंतुजग्धा वशिष्टकं॥ सार: सो गुरुरस्मात्तु भाग्ज: क्रमो विशिष्यतइति॥ लामज्जमुशीरं॥

समंङ्गारक्तपादायांवलामञ्जिष्ट्योरपि गच अजश्रृङ्गीकर्कटकीमेष
श्रृङ्ग्योश्वयोषिति गान्ना: घट्टि लघुलोहे चलामज्जेस्य क्रायानुलघु:
स्त्रियाम् घत्रि अमोघाविजयाकालवृन्तिकाचित्रतण्डुले घान्ना:

वीरणमूलं॥ लामज्जकमुशीरवत्सीनलबिल्लणविशेषइतिकेचित्॥ स्पृक्का माल्यवती॥ घत्रि॥
अमोघेति॰ विजयापथ्या॥ अमोघ: सफलेऽमोघाख्योनापथ्या विडंगयोरितिविश्वलोच
ना:॥ कालवृन्तिकापाटलि:॥ अलिप्रियाविशालायाप्यमोघापाटलिर्द्वयोरितिवाचस्प
ति:॥ मोघापि॰ मोघास्त्रीपाटलावृक्षेमोघंत्रिपुनिरर्थकइतिरुद्र:॥ पाटलापारप: सारि
सेल्लुपत्र: प्रसिद्धकइति॥ चित्रतण्डुलं विडंगं॥ चित्रतंडुलेपिमोघा॥ क्रिमिघ्नंतण्डुलंमो

॥ ॥ गच्छे॥ गाढ़ा॥ ङ्कपु॥ ताडाङ्क॥ टि

शिवम०
३२
33

चर्द्धि॥कचमिति॰उदीच्यमंचु॥सिद्धो चांबुदवालकाविति॥कर्पासरत्त्रलफलः॥चञ्चुरिति॰
सितिवारकः सुनिषण्णः॥टणकोगुखिरक्तो कसायपत्रोणुवीजकः॥श्वेतमंजरिकः क्षैत्रे शूरूः
स्यात्सितिवारक इति चंचुशाकोनाडीच्यः॥चंचुस्त्रो पुं। स्त्रियां पुंसि गोनाद्येष्वंडबक इसुभय
त्रापि मेदिनी। चोचमिति॥त्वक्पत्रकं॥त्वक्चोचत्वशब्दास्युर्वल्के चर्म्मणि पत्रके इति धरणिः
॥गुडत्वगुत्कटं भृंगं तनुकं स्वर्णभूमिकमिति धर्म्मिष्ठः॥त्वक् स्त्रियां वल्कलेपि स्याच्चर्म्ममात्रे गुड

चर्द्धि कचं तूदीच्ये कर्पासे चञ्चुर्ना सितिवारके। चञ्चुशाके वर्द्धमाने चोचं
त्वचि गुडत्वचि दाक्षिण्णसफलतालफले च नवनीतके। चोचो माणवके

त्वचीति विश्वलोचनः। दाक्षिण्णसो नालिकेरः॥तालस्तृणध्वजः॥नवनीतकं॥कदलं॥रीभं
तु कदलं चोचं जालकं नवनीतकं॥लोचकश्चेति सिंहः॥भूछत्रक इति लोके॥माणवकं पा
लेवतं। तद्विविधमस्यादम्लं च॥यथा सिद्धमंत्रप्रकाशे वोपदेवः॥पारेवतं मधुरमम्लमि
ति द्विधा स्यात्तिंदुकाकृतिफलं लघु पांडुपुष्पं॥नीलछदं द्विगदि तं तु परे वतारख्यं तसु ३२
घ्वराश्रमसमीपवने प्रसिद्धमिति॥ ॥ ॥

मोचइति ० पिच्छा मोचरसः ॥ घनच्छदः शिग्रुः ॥ शल्लकी गजभक्ष्या ॥ रंभा कदली ॥ नीलपुष्पी नीला ॥ चि
रायुः शाल्मली ॥ वृष्टिर्वर्षसहस्राणि वनजीवति शाल्मलिरिति ॥ चत्रि ॥ कवचइति ० पर्पटः शीनवल्लभ
॥ नंदिपादपः प्ररोही स्फूर्जनन्नर्नंदी वृक्षोबनस्पतिरिति केयदेवः ॥ पिप्पलभेदः ॥ गूढपत्रकरीर
॥ क्रकचइति ० गूढपत्रः करीरः ॥ हल्लीमकः ॥ केतकी ० करपत्रवत् दलैः पीतसितैर्युतैर्नैकंटकैरद्भुत
फलं ॥ क्वचित्कदाचिन्नस्यात्तदरुणंकल्मशोपममिति ॥ निकोचइति ० अंकोटोंकोलः ॥ अंकोटस्तुनिके

मोचः पिच्छायां चल्लनच्छदे ॥ मोचात्तु शल्लकी रम्भा नीलपुष्पी चिरायुषि । चत्रि । कवचः ॥
पर्पटनंदिपादपेगूढपत्रके ॥ क्रकचो गूढपत्रे स्यात्क्रकचा तु हल्लीमके ॥ निकोचोङ्कोटके
मुस्तेमरिचंक्लीवमूषणे ॥ पुंसि जम्बीरशाके स्यात्तमारीचं तीक्ष्णकोलयोः ॥ ॥ ॥

चकइत्यमरः ॥ ढेअंकोटस्य ठेराइति ख्यातस्येति रामः ॥ अथांकोटो गुलिपत्रकः ॥ पादपः कंटकी सा
शमटृढभूमो प्रसिद्धक इति ॥ मुस्तमं बुधरः ॥ मरिचमिति ॥ ऊषणं तीक्ष्णं ॥ मरिचं तीक्ष्णमूषणमिति
धर्मदासः ॥ दीर्घमध्यमपि ० शीत लरंदहरेत्सद्यो मरीचसुरसारसेरिति विवृद्धदेघवल्लभा ॥ मारीचं कोल
कंकुलमूषणं धर्मपत्तनमित्यमरः ॥ जंबीरशाकं जंभलाख्यं तद्रल्लक्षणं तु ० जंबीरगंधि हरितं पत्रम्लक
टुकं रसे । शाकं जंबीरमित्युक्तं जंभलं चोत्तरापथ इति ॥ मारीचमिति ० तीक्ष्णमूषणं ॥ कोलं कंकोलं ॥ कंको

लं कटुकं कोलं मारीचं माधवोचितं मिति धर्मघ्नः ॥

शिवप्र०स चच॥उपकुञ्चीति॰राजिका आसुरी॥स्थूले त्वाद्रविडी॥सूक्ष्मा सुमात्रिको लाफलवीजकं।सूक्ष्मं त्रुटिः सुगंधेति॥
३४ कृष्णजीरः कृष्णाजाजी॥तनुत्वगिति॰अरणिर्द्वस्तनमंथः॥रोध्रोऽक्षिभेषज्य॥रलयोरैक्यात्लोध्रोपि॥वृ
हत्वगिति॰भूर्जो लिख्यपत्रः॥पर्णलत्वचः कुंजरविंदु शोणाः॥पर्णः सप्तपर्णः॥सप्तपर्णो गुच्छपुष्पो बकुलत्व
क् शाल्मलिच्छदइति॰गजमदगंधिः॥नपत्रयुग्मच्छदगंधिराद्वितांभशं नृपोपायनदंतिनां मदइति भार
विः॥हिलमोचीति॰जलब्रह्मीमहौषधी॥अयमहौषधी मघी विषघ्नी चक्रांगी मत्स्याक्षी हिलमोचि
का।जलब्रह्मी चसेति त्रिकांडशेषः॥हिलमोचीशंखधराजलब्रह्मी चसामतेतिकेयदेवः॥मूलकंतुम

चच॥उपकुञ्चीराजिकायांस्थूलेत्वात्कृष्णजीरयोः॥तनुत्वगरणौरोध्रेवृहत्वक्भूर्जपर्णयोः॥हि
लमोचीजलब्रह्मीमूलकाशोकवास्तुके।चान्नाः।छिक्कच्छाशवरकन्दे चकच्छः कान्तालकप्रसुमे॥

हाकंदं स्वस्तिको हस्तिदंतकइतिकेयदेवः॥अशोको वीतशोकः॥वास्तुको वीरशाकः॥चान्नाः॥छिक्कि॥कच्छेति
॰शवरकंदो वाराहीकंदः॥कच्छा तु चीरिकायां स्याद्वाराह्यामपि दृश्यतइति विश्वलोचनः॥वाराही सूकरी
कच्छा मागधी गृष्टिका वरा॥तस्याः कंदस्तु चक्राख्युर्वन्यः शवरकंदकइतिकेयदेवः॥क्षीरान्विता मूलककु
त्सकंदा सप्ताष्टरक्तासिततस्ककांडा।विभर्ति या पल्लवमदृशाद्यात्साकंचुकीश्वेतवपुर्वरिष्टपत्रशृंगसंग्र ३४
हः॥श्यावककर्कशावाराहवृषणाकारकंदका॥तांबूलवल्लीच्छदवद्वराहीघृष्टिरन्यतरत्सज्ञा॥तस्याः कं
दः॥कांतालकप्रसुमस्तुणिः।नंदिस्तुणिर्नंदिवृक्षः कच्छः कांतालकस्तथेति धर्मदासः॥ ॥ ॥

पिछेति॰ भक्तमंडः॥ ओदननिर्यूहः॥ मोचाशाल्मली॥ शाल्मलिवेष्टेष्टो मोचरसः॥ मोचास्रावे मोचरसः शा
ल्मलीवेष्टकस्तथेति केयदेवः॥ छौन्नाः॥ जंघे॥ अंबुमिति॰ शंखः कंबुः॥ निचुलो हि ज्जलः॥ अथ हिज्जलः॥
इज्जलो ष्यंबुजो रक्तमंजरो निचुलोपि चेति सिंहः॥ अंबुजं पंकजं॥ सरोजांबुजपंकजं। कैरवं चाब्जमंभोजमि
ति केयदेवः॥ कुब्जइति॰ कुब्जो वृहत्पुष्पः शतपत्रिकाभेदः॥ कुब्जको भद्रतरणी वृहत्पुष्पेति केसरइति
धन्वंतरिः॥ आघाटो वासकः॥ वासाविटपकस्तिक्ता कुटजा भद्रलाफला॥ प्रसिद्धेति॥ छिजेति॰ कोती

पिच्छा भक्तस्य मण्डे च मोचा शाल्मलिवेष्टयोः॥ छौन्नाः॥ जंघे॥ अब्जं शङ्खे ऽस्त्रियां नातु निचुले हिज्जलेंबुजे॥ कुब्जस्तरण्यामाघाटे छिजा कोन्द्यां च बर्वरे॥ पिच्छा तूले हरिद्रायां फञ्जी पद्मा विशल्ययोः

रेणुका॥ बर्वरः भार्ङ्गी॥ छिजा भार्ङ्गी रेणुकयोरिति हेमचन्द्रः॥ भार्ङ्गी भृगुभवा पद्मा फंजी ब्राह्मणय
ष्टिकेति धर्मसिंधुः॥ अंगारवल्ली फंजी बबचो बर्बरकस्तथेति धन्वंतरिः॥ भार्ङ्गी महीरुहः शेलेंगुल्मरि
छदनासिता॥ ब्रस्तधात्रीसमेति। पिच्छेति॰ तूलः कर्पासः॥ हरिद्रा वरवर्णिनी। पिंजा तूलहरिद्रयो
रिति लोचनः॥ फञ्जीति॰ पद्मांगारवल्ली॥ फञ्जी पद्मांगारवल्ली महागर्दभगंधिकेति धर्मदासः॥ भा
र्ङ्गीति लोके। विशल्या ह्रवंती॥ विशल्योदुंबरछदा। द्रवन्ती शम्बरी फञ्जी न्यग्रोधी मूषिका ह्वयेति केय

रजइति॰ परागःसुमनोरजः॥ रेणुःपर्य्यायः॥ रजेनापिरजस्समितिद्विरूपकोषः॥ लाजइति॰ अर्द्रतंडुलः अश्रु
कतंडुलः॥ उशीरंवीरणमूलं॥ स्त्रियंपुंसिवकुलेचअक्षतेषु॥ सर्ज्जइति॰ अश्वकर्णशालः॥ यस्यनिर्या
सःरालः॥ कंडूराकपिकच्छूः॥ हस्तिपिप्पलिकागजपिप्पली॥ चविकाचव्यिकाअसावरण्यपिप्पलिकी
समा॥ स्थिरातिकटुका तस्याःफलंतुगजपिप्पलीति॥ असनोवीजकः॥ जन्त्रि॥ अम्बुजइति॰ निचुलो
हिज्जुलः॥ कमलमम्बुजं॥ अद्रिजमिति॰ पलितंसिल्हकं॥ तुरुष्कपादपःसेल्हुरलवत्फलबीजकंशे

रजः॥ परागेरेणौचलाजःस्यादार्द्रतण्डुले॥ नपुंसकमुशीरेथस्त्रियांम्भूम्निचाक्षते। सर्जोश्वक
र्णकण्डूराहस्तिपिप्पलिकासने॥ जन्त्रि॥ अम्बुजोनिचुलेपुंसिकमलेक्लीवमद्रिजम्। पलिते
शैलनिर्यासेकरजंघृतपूरके। नखेचकारुजोधातौकेसरेतिलभिद्यपि॥ काम्बोजःश्वेतखदि
दिरेपुंन्नागेसोमवल्कले॥ काम्बोजीपाण्डुराहिङ्गुपत्रीचूडामणिष्वपि॥ ॥ ॥

लेयस्तद्रसइति॥ शैलनिर्यासःशिलाजतु॥ अद्रिशिलाद्रवः॥ शिलाजत्वऽसितंमृत्स्नंशिलाधातुः॥ ग्री
ष्मेतीव्रार्कतप्तेभ्यःपादेभ्योहिमभूभृतः स्वर्णरूप्यार्कगर्भेभ्यःशिलाधातुर्विनिःसरेदितिवाग्भटः॥ करज
मिति॰ घृतपूरकःकरंजः॥ नखोव्याघ्रनखः॥ कारुजइति॰ धातुःस्वर्णादिः॥ केसरःकरिकेसरः॥ तिलभिद्
त्रवन्यतिलः॥ कांबोजइति॰ श्वेतखदिरःगायत्री॥ पुन्नागश्चिपकभेदइतिरुद्रगणः॥ सोमवल्कवल्कलःकटु ३५

गिरिजमिति॰ अमलममभ्रकं ॥ अभ्रकं गिरिजाऽमले इत्यमरः ॥ लोहं मलिनं ॥ शिलाजतु शिलाह्वं ॥ गैरिकं
गिरिमृत् ॥ मातुलुंगी बीजपूरकः ॥ कंटकेसरेषु पठितः ॥ परिपाके प्रलम्बफलः ॥ जलजमिति॰ शंखः कंबुः ॥
पद्मं श्वेतकमलं ॥ नीरजमिति॰ कमलमब्जं ॥ कुष्ठं गदाह्वयं ॥ वनज इति॰ अंधकस्तुंबुरुः ॥ तुंबुरुः सौरसः
सौरो वनजः सानुजोऽधक इति भावमिश्रः ॥ मुस्तोऽम्बुधरः ॥ गदः पारिभाव्यं ॥ अंबुजमब्जं ॥ मुरुपर्णी मृगगं

गिरिजं चामले लोहे शिलाजतुनि गैरिके ॥ गिरिजा मातुलुंग्यां च जलजं शङ्खपद्मयोः ॥ नीरजं कमले
कुष्ठे वनजोऽन्धकमुस्तयोः ॥ स्त्री वंगेऽम्बुजे स्त्री तु मुरुपर्ण्यां श्वगन्धयोः ॥ शिलाजमिन्द्रजतुनि शैलेय
स्त्री शिलात्वचि । जं च क्षीराब्धिजं स्यात्सामुद्रलवणे मौक्तिकेऽपि च । काश्मीरजा विषयां स्त्री वं कुष्ठे च पौ
ष्करे धीरे ॥ ॥

धा ॥ मृगगंधा शिं विषपर्णी वनजा शिं विरिंगिणीति कैयदेवः ॥ अश्वगंधा तुरगी ॥ शिलाजमिति॰ इंद्रजतु शिला
ह्वं ॥ शिलाजतिं इंद्रजत्वपि ॥ जत्वश्मजं शिलाह्वं च गिरिजं गिरिजाह्वयमिति हृदयदीपकः ॥ शैलेयं शिलापुष्पं
शिलात्वक् पाषाणभेदः ॥ जंच ॥ क्षीराब्धिजमिति॰ सामुद्रलवणमक्षिलवणं ॥ मौक्तिकं मुक्ताफलं ॥ काश्मी
रजेति॰ ॥ विषा अतिविषा ॥ कुष्ठमामयः ॥ पौष्करं पुष्करमूलं ॥ धीरं कुंकुमं ॥ ॥ ॥ ॥

शिवप्र॰ त्वणराजइति॰ गुडत्रक्षइक्षुः॥ मोचाशाल्मली॥ कत्तृणं रामं कर्पूराख्यं॥ तालो लेख्यपत्रः॥ त्वणराजो दी
३६ र्घतरुर्लेख्यपत्रो द्रुमेश्वरइति नाममाला॥ रसराजइति॰ स्वादुरसो मधुररसः॥ पारदः सूतः॥ रसाञ्जनं ता
र्क्ष्यं॥ जयं॥ अक्षिभेषजइति॰ पुष्पकासीसं मलीमसं॥ कासीसं धातुकासीसं शोधनं खेचरं तथा॥ क्लिष्टी
यं पुष्पकासीसं लेखनं च मलीमसमिति केयदेवः॥ रोध्रः पट्टिकाख्यः॥ मुनिभेषजमिति॰ आगस्त्यावं

त्वणराजो गुडवृक्षे मोचायां कत्तृणे ताले॥ रसराजः स्वादुरसे पारदे च रसाञ्जने॥ जयं॥ अक्षिभेष
जः शाबरे ना पुष्पकासीसरोध्रयोः॥ मुनिभेषजमागस्त्ये हरीतक्यां च लङ्घने॥ जात्राः॥ टड्डि कटु
र्द्रे तासुरी कट्वी प्रियङ्गु विजयावहे। ज्योतिष्मत्यां काकमाच्यामथ त्रिकटुके कटु॥ ॥

गसेनः॥ हरीतकी पथ्या॥ लंघनमुपवासः॥ तस्येहाभिधानं परमौषधत्वात्॥ जात्राः॥ टड्डि॥ कटुरीति
॰ लतालताकस्तूरिका॥ कस्तूरीलतिका चापि तद्गन्धाद्दक्षिणेऽक्षका॥ अन्याप्रतानिनी काष्ठावटपत्रा
ऽल्पपुष्पिका॥ सुगंधिनस्तु विंवा भोगस्तनी फलिका स्थिरेति॥ आसुरी राजिका॥ कट्वी मत्स्यपित्ता॥ प्रियं ३६
गुर्वनिताह्वा॥ विजयावहः सर्षपः॥ ज्योतिष्मती कंगुणिका॥ काकमाची काका॥ त्रिकटुकं शुंठीमरि
चपिप्पल्यः॥ ॥

कुट इति॰ कृतभुग्वह्निः॥ गंधकुटी॥ मुरागंधकुटीदेत्याहुगंधकुटीकुटिरितिके यदेवः॥ मुराहिमादि देशोद्भुवत्वं मुस्तोपमंमृदु॥ सुगंधि शीतं॥ घृष्टिरिति॰॥ मूलकमूलाभः किरिः॥ घृष्टिः स्त्री घर्षणेस्पर्धा विष्णुक्रान्तासुनाकिराविति मेदिनी॥ विषोदरः शंखपुष्पीभेदः॥ शंखपुष्प्यासितारुणवच्छिन्नेत्तल्लणकेवि ष्वक् लोमशोल्पकपत्रके इति॥ घोण्टेति॰ मदनं राठः॥ पूगवृक्षः वेंवुक॥ वदरीभिदऽत्रारण्यवदरीसूक्ष्म

कुटेकृतभुजि स्त्रीतु गन्धकुट्यां कुटी कुटिः॥ घृष्टिर्मूलकमूलाभपुमान्स्त्रीतु विषोदरे॥
घोण्टातु मदने पूगवृक्षेच वदरीभिदि॥ जटी प्लक्षे गर्द्दभाण्डेथो मूलेन ल दे जटा॥ ॥

फला॥ वदरी सदृशाकारो वृक्षः सूक्ष्मफलो भवेत॥ अरण्ये आमे वसाघोण्टा गोपघोण्टा च सोच्यत इति सु भूतिः॥ अरण्यवदरी गृध्रनखी घोण्टा इति सिंहः॥ जटीति॰ प्लक्षः पर्कटी॥ पाकरिरिति लोके॥ गर्द्दभाण्डः पिप्पलभेदः॥ अधोमुखपत्रशाखः॥ जटः कृत संघाते॥ सर्वधातुभ्य इन्॥ जटिः॥ कृदिकारादिति जटी तिस र्वधरः॥ गर्द्दभाण्डे जटी प्लक्षा विति रुद्रः॥ जटायोगान्नान्तः पुल्लिङ्गाश्च॥ मूलं वृक्षादीनां॥ नलदं ज टा मांसी॥ मांसी मातामूतकेशी नलदं जटिलं जटेति केपदेवः॥ ॥

श्रावस० ३७

झिण्टीति० सैरेयकस्तु झिण्टी स्यादित्यमरः॥ बाणा दासी॥ बाणा दासी भुजिष्ययोरिति मेदिनी॥ नीलझिण्टीह यार्बाणा दासी चार्त्तगलश्च सेत्यमरः॥ साम दासहा॥ नीला नीलपुष्पा झिण्टी इत्यादि शब्दवाच्यस्यार्थः॥ व दरी गोपाघोण्टा॥ मोदकी गुडमंजरी॥ झिंगिली झिंगिली झिंटी मोदकी गुडमंजरी। झिंगिली पादपस्ती श्रूण समि हाडिमपत्रकः अपुष्पः कोलफलकश्चेति॥ जीगलिरिति पश्चिमे ख्यातो वृक्षः॥ त्रुटिरिति० एला सूक्ष्मैला॥ कटुफलः॥ कटुफलः॥ नट इति० नट मंडनं हरितालं। नटः पोटगलः॥ अशोको वीतशोकः। वंशं कुटं नटं प्लवं वन्यं वितुन्नं परिपेलवमिति निघंटुः॥ मुस्ताभेदः॥ नलीकपोतांघ्रिर्नटी नलीत्यमरः॥

॥ झिण्टी सैरेयके बाणा बदरी मोदकी भुच॥ त्रुटिरेला कटुफलयोर्नटस्तु नटमण्डने॥ नटे शोकनटं वन्ये नली नीलिकयोर्नटी। पटुः पुंसि पटोले स्त्री छत्रा पालङ्ग्यलेपटु॥ पद्मिः स्त्री कृष्णवृन्तायां पट्टी लाक्षाप्रसादने॥ वटो वराटे न्यग्रोधे यष्टी क्लीतकयष्टयोः॥

नीलिका नीली॥ पटुरिति० पटोलस्तिक्तकः पटुरित्यमरः॥ छत्रा मिसिः॥ लवणं सैंधवादि॥ पद्मि रिति० कृष्णवृन्ता पाटला॥ पाटला पादपः सारिसलुपत्रः प्रसिद्धकः॥ काष्ठपाटलिका तद्वल्कदं वद लिनी सितेति॥ लाक्षाप्रसादनो रोध्रः॥ वट इति० वराटः कपर्दकः॥ न्यग्रोधो वटः पादवृक्ष इत्यमरः॥ यष्टीति० क्लीतकं यष्टीमधु॥ यष्टी च मधुयष्टी च यष्टीमधुकमेव चेति वाचस्पतिः॥ मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिकेत्यमरः॥ पद्माभागी॥ भागी महीरुहः शैलेंगुल्मः रिद्धदनासिता॥ अस्तधा ३७

रिष्ट इति॰ कुष्ठं वाप्यं॥ कुष्ठं गदाह्वयं मूलं त्वस्य पुष्करमूलकमिति त्रिकांडशेषः॥ तु कुपुष्करावभि
न्नौ तु विरपौ तुरगी इत्यौ॥ सिताऽसितसमित्यौ च गिरौ मूलक कंदिनाविति॥ तुरगी अश्वगंधाः पूनिलोरि
ष्टः॥ विटइति॰ अब्जकमलं॥ लवणंपटु॥ रिमोऽरिमः॥ शटीति॰ शटी शटितं शत्वा तु रित्यूष्म विवेकात्व
तालव्यादिः॥ अत्र पुनर्नवाभेदः॥ शटी विरली र्लवहली स्यादिति॥ गंधमूला सुव्रता॥ शटी पलाशी पृथ्वग्रं

रिष्टः कुष्ठे पेनिले च विटो कूले लवणे रिमे। शटी पुनर्नवाभेद गन्धमूला मयूरके॥ द्वत्रि॥ अरिष्टो लसु
ने निम्बे रिष्टेऽरिष्टं तु गोरसे। स्त्रियां नागवल्लाकद्वोर्मघभेदे तु नस्त्रियाम्॥ उच्चटा श्वेतगुञ्जायां भूधा
त्रीछत्रमुस्तयोः॥

थासुव्रता गंधमूलिका॰ गंधमूलिका गंधद्रव्यं काश्मीरे प्रसिद्धं। शटी सटी च कर्चूर इति हृदयदीप
कः॥ मयूरकोऽपामार्गः॥ द्वत्रि॥ अरिष्ट इति॰ लसुनं म्लेच्छ कंदः॥ निंबः पिचुमंदः॥ रिष्टो रक्षावी
जः॥ गोरसः॥ कालसेयं॥ दंडाहतं कालसेयं गोरस इति हृदयदीपकः॥ नागवल्ला गांगेरुकी॥ कद्वी क
टुरोहिणी॥ क्वथितो षधयुक्ते र्मघकैरः कृतं मघमरिष्टः॥ उच्चटेति॰ श्वेतगुंजा काकमंडिका भूधा
त्रीभूम्यामलकी॰ छत्रमुस्तां चूडाला॰ यच्छत्रमुस्तकं तत्र चूडाला चक्रलोऽच्चटेति सिंहः॥ ॥

करटीति॰ अत्नमकोलङ्का॥ बिल्वः श्रीफलः॥ करीरो गूढपत्रः॥ कच्चूरमिति॰ तोयपिप्पली जलपिप्पली गं
डूपदीनोयवल्ली सांगलीकं चरं चतदिति केयदेवः॥ घुकुं नयनिसगावेति लोके॥ तंडुलीयो मार्षः॥ तन्देदोज
लतंडुलीयः। पानीयतंडुलीयोयरतत्वं चरमुदाहृतमिति भावमिश्रः॥ कर्कोटीति॰ देवताडे देवदाली॥ क
र्कशाच्छदाकटुकोशातकी॥ कोशातकीतु कर्कोटीजालिनी कर्कशच्छदेति केयदेवः॥ कर्कटीति॰ बीजयेशी
कमलादिकर्णिकाबीजाधारभूता॥ एर्वारुः कर्कटिः। उन्मत्तो धुस्तुरिर्वारुः कर्कटिः स्यादिति पुंस्त्वं उरत्न
कोषः॥ दीर्घादिरपि तुर्यस्वरादिरीर्वारुः कर्कट्यां कथ्यते बुधैरिति। प्रमत्तावात्तु चिरीर्वारुरिति हारावली॥

करघुलकके क्लीबं पुंसि बिल्वकरीरयोः। कच्चूरं तोयपिप्पल्यां तण्डुलीयकमित्यपि। कर्कोटी
स्याद्देवताडकर्कशच्छदयोरपि। कर्कटी बीजपेशयां स्यादिर्वारौ शाल्मलीफले। कर्कटाकुलिरायां
चकर्कटं मृगलिण्डुके। करहाटे कर्कटः स्यात्कुक्कुटः शिखिवारके। गूढपत्रे कुक्कुटी तु काकण्त्रीरसे

आडिः एर्वारुरपि॥ शाल्मलीफलं तूलिनीफलं। कुलिराकुलीरशृंगी॥ कर्कटारव्या कर्कटकीशृंगी कर्क
रशृंगयपि। कुलीरशृंगी कुलिरेति हृदयदीपकः॥ मृगलिण्डकं गांगेरुकीफलं॥ करहाटः शिफाकंदः॥
कुक्कुट इति॰ शिखिवारः शितिवरः स्वस्तिकः सुनिषण्णकः॥ श्रीवारकः सूचिपत्रः पर्णासः कुक्कुटः शि
खीति निघंटुः॥ गूढपत्रः करीरः। काकणंती गुंजा। रसोनो रिष्टः॥ कंदभेदः॥ त्रन्कुक्कुटी स्फुटिकरश्चितकु
क्कुटाण्डसदृशकंदाकुक्कुटी शारीरवल कुसुम विचित्रावल्लीति उत्तरे पूतना प्रतिषेधे उल्हणः॥ कुक्कुटी
लक्ष्माकुसुंभः। मोचा शाल्मली॥ अश्मभित्पाषाणभेदः॥ ॥

३८

कुरलीति॰ शीर्षमंजरी सितिवारकः॥ किंकिरातः पीतवासकः॥ कुनटीति॰ मनःशिलादिसौषधिः॥ने
पाली कुनटी गोला शिलाद्विसौ षधिः स्मृतेति धर्मिष्ठः॥ तालकस्येव भेदात्तु मनोगुप्तातदंतरं॥ ताल
कंत्वतिपीतंस्यान्नवेदृ्याम नःशिलेति भावमिश्रः॥ धातुर्नेपालीरजाःऽलं पीतं वर्णकमित्यन्यत्रापि॥
मनःशिला त्रिधाप्रोक्ता श्यामांगी कणवीरका। खंडाख्या चेति तद्रूपं विविच्य परिकथ्यते॥ श्यामारक्ता
सगौरा च भाराढ्या श्यामिका मता॥ तेजस्विनी च निर्गौरा ताम्राभा कणवीरका॥ चूर्णीभूता ऽतिरक्तांगी
सभारा खंडपूर्विकेति वाग्भटः॥ नेपाली मनोज्ञा॥ मनोज्ञा शिशुगंधिका। नेपाली चेति केयदेवः॥ निवारी

कुरण्टी शीर्षमञ्जर्यांकुरण्टः किङ्किरातके॥ कुनटी मनःशिलायां नेपाल्यां च वितुन्नके॥ च
र्पटः पर्पटेपि स्यात् पिष्टभेदेपि चर्पटी॥ त्रिकण्टस्त्रिकण्टगोक्षुरेपि च॥ त्रिपुटे
एलामल्लिकयोस्त्रिवृता वृहदेलयोः॥ सतीनके तु चणके त्रिपुटश्च॥ ॥ ॥

त्या रम्यया रम्या तो मल्लिका भेदः॥ वितुन्नकं धनिका॥ कुनटी धनिका छत्राकुरतुं तु रु वितुन्नकमिति भा
वमिश्रः॥ चर्पट इति॰ पर्पटः॥ निस्तुषमाषादि चूर्णस्य हिंगुसैंधवस्वर्जिकप्पारिचजीरकदधिवटुते
लादियुक्तस्य कुट्टितमर्दितस्य कृतो मंडकः॥ पिष्टभेदे त्र पोली॥ अथ पोली पूपली चर्पटी च सेति त्रिकांड
शेषः॥ त्रिकण्ट इति॰ शवृक्षयं॥ शृंगाटः जलवल्लीफलं॥ गोक्षुरः॥ त्रिकंटस्त्रिकटस्त्रिकर इति केयदेवः
॥ त्रिपुटेति॰ एलासूक्ष्मैला॥ वाचस्पतिस्तु त्रिपुटीत्यपि पठति। मल्लिकात्तलमूलं॥ त्रिवृता सरणा॥ सर्व

अथपर्कटी॰पूगादिनूतनफलं॥लक्षोदुंगादि॥प्लक्षः॥पर्कटीप्लक्षेपिप्पलपादपइतिशाश्वतः॥पिप्प
लभेदः॥फलीशः क्षीरपादइत्यपरपर्यायः॥पर्पटीति॰जतुकृष्णा॰पर्पटीरंजनीकृष्णाजतुकाजननी
जनी॥जतुकृष्णाचसंस्पर्शाजतुकृच्चवर्ध्दिनी॥पापरीतिप्रसिद्धा॰पद्मावती॰इतिप्रसिद्धं सुगंधिद्र
व्यमितिभावमिश्रः॥रजःकवचः॥पर्पटीमंजरीवृद्धः॥विटपइति॰पिष्टभिदत्रपर्पटः॥मर्कटीति॰शू
कशिंबा॥देयाजांगलिकासेवसा॰जहाप्राद्वृषायणीतेंदुः॥शूकशिंबिरक्तमर्कटी॥शूकशिंबाचे

अथपर्कटी॥पूगादिनूतनफलेप्लक्षपिप्पलभेदयोः॥पर्पटीजतुकृष्णायांरजःपिष्टभिदोर्द्व
योः॥मर्कटीशूकशिम्बायांचक्राङ्गांकरजान्तरे॥अपामार्गस्यभेदेचधान्यभेदेतुमर्कटः॥
मार्कटोराजकर्कद्याः॥प्राचीनामलकस्यच॥वीजगवेधुकायांश्चफलेपुंसि॥

तिवाचस्पतिः॥कृत्स्नादिश्च॥माषवल्लाभ्रुकशिंबाकर्षणरास्नोक्तवृकाश्वगंधानामितिचक्रः॥श
शभ्रूतुष्णांकशिशिराणिचशूकशिंबिरिसूक्ष्मविवेकाद्विलालघ्नः॥चक्रांगीकटुका॥करजःकरंज
ः॥अपामार्गःशिखरी॥मर्कटस्तृणधान्यं॥मार्कटइति॰राजकर्कटीखर्खारूः॥प्राचीनामलकं
वारिवदरं॥प्राचीनामलकवारिवदरेद्वेइतित्रिकांडशेषः॥प्राचीनामलकंरक्तंवदरामलकंच
तत्॥प्राचीनागरमप्येतदितिसिंहः॥तयोर्वीजे॥उष्णियोस्पावयवः॥गवेधुकातृणधान्यम्॥ ३९

अथमोरटमिति॰ सप्तरात्रात्परक्षीरम्॥ सप्ताहान्मोहलंमलिनमिति टवर्गपंचमं पठति ह्रस्वपट्टीपकः॥ अंकोठंकोलः॥ इक्षुमूलंदीर्घपत्रजटा॥ पीलुपर्णीमूर्वा॥ मोवाटइति॰ कृष्णजीरकं कालजीरकं॥ चंदनंगंधसारं॥ स्वादुनेकटुकंशीतमीषत्पीतंचघर्षणे॥ छेदनेरक्तवर्णंयत्चंदनंतद्वरंपरमिति धर्मिष्ठः॥ कदलीगर्भःरम्भामध्यावयवः॥ शलाटुरिति॰ शिवंधात्रीफलं॥ भिन्नात्वङ्मंडलोवाढांरूलकाष्ठेःशुपंक्तिवैः॥ द्रुलेद्रुमःफलंधात्रीफलमस्येति॥ विल्वंश्रीफलं॥ शार्ङ्गेति॰ काकणंती

अथमोरटम्॥ सप्तरात्रात्परक्षीरेऽङ्कोठपुष्पेक्षुमूलयोः॥ मोरटापीलुपर्ण्यांचमोवाटःकृष्णजीरके॥ चन्दनेकदलीगर्भेशलाटुःशिवबिल्वयोः॥ शार्ङ्गष्ठाकाकणन्त्यांचकाकमाचीकरञ्जयोः॥ टचाकरहाटःपद्मकन्देपिण्डीतेपकुरंनटम्॥ कैवर्तीमुस्तकेजिह्मेशालूकेचाकुटंनटः॥

रक्तगुंजा॥ काकमाचीकाका॥ करंजःकरजः॥ टच॥ करहाटइति॰ पद्मकंदःशालूकं॥ पिंडीतोमदनफलं॥ करहाटोमरुवकः शल्यकोविषपुष्पकइतिधर्मिष्ठः॥ अथकुटंनटमिति॰ कैवर्तीमुस्तकंपरिपेलवं॥ परिपेलवंप्लवंवन्यंतत्कुटंनटसंज्ञकं॥ जायतेमंडुकाकारंशैवालदलसंचयइत्यजयः॥ जिह्मंतगरं॥ शालूकोऽल्लुः॥ शालूकोविजनोभक्तःपथुश्शिवंकुटंनटइतिकेयदेवः॥॥

।द्वितीय॰

४०

गोपघोण्टइति॰ पूगफलमुद्वेगः ॥ विकंकतमहीरुहः ॥ स्रुवतरुः ॥ वृक्षकंटकाविकेति प्रसिद्धइतिङ्
श्चणक्षितबगी । यवनेष्टइति॰ ॥ पारिभद्रेनिंबः ॥ लशुनमरिष्टं ॥ केशान्केशविनाशनेशलशुनमथ्यं
श्नुशीतांश्चावइति विवेकात्लताव्यमध्यः ॥ हस्तमूलकं स्कंमूलकं ॥ खर्जूरी दुरारोहा ॥ मरिचमूषणं ॥
सीसकंत्रपु ॥ विषमुष्टिरिति॰ महानिंबोद्देश्का ॥ क्षुद्रमुष्टिः केशमुष्टिः ॥ विषमुष्टिः केशमुष्टिः क्षुद्रमुष्टिः
सुमुष्टिकेति केपदेवः । तोडीतिरव्यातः फलशाकः ॥ कुपीलुः काकपीलुकः ॥ सिंहभ्रटेति॰ पुन्नागकेसरोदे

गोपघोण्टः पूगफले विकङ्कतमहीरुहे । यवनेष्टः पारिभद्रे लशुने हस्तमूलके । खर्जूर्यां मरिचे चाथो य
वनेष्टं च सीसके । विषमुष्टिर्महानिम्बे क्षुद्रमुष्टौ कुपीलुनि । सिंहभ्रटा तु पुन्नागकेसरे नागकेसरे । टान्ताः ।
उद्धिकाश्मारुहारिद्रायां काष्ठं सामान्यदारुणि । कुष्ठं तु नद्ययोः पारिभाव्ये रामत्वणे पुमान् । शठस्तूमत्तनगर
देववल्लभः ॥ नागकेसरः करिकेसरः ॥ ॥ रस्फ्वान्तु कुङ्कुमे पुंच । ठान्ताः । अम्बष्ठा माचिकापाठाचांगेरीषु थियं

अथसुवर्णाभनागाख्यो नागकेसरः ॥ स्यात्पुष्परोचनश्चापीति पुरुषोत्तमः ॥ टान्ताः ॥ ठद्धि ॥ काष्ठेति॰ दा
रुहरिद्रापचंपचा ॥ सामान्यदारुइंधनं ॥ काष्ठं दार्विंधिनं त्वेधइत्यमरः ॥ कुष्ठमिति॰ पारिभाव्यं कोवेरंभा
स्वरं कुष्ठं पारिभाव्यं गदाह्वयमिति रभसः ॥ रामत्वणं कत्तृणं ॥ शठइति॰ उन्मत्तो धुस्तूरः ॥ नगरं वक्रं ॥ शंखा
फाशंखपुष्पी ॥ कुंकुमं वाह्लीकं ॥ ठान्त्रि ॥ अंबष्ठेति॰ । माचिका अंबालिका ॥ अंबष्ठा बष्ठकी दंतशठा चां
इतिरव्यातो वृक्षविशेषः ॥ पाठा पापचेली ॥ चांगेरी अम्लवाटिका ॥ अम्लपत्रिकेति समानार्थाः ॥ यू

४०

रामठमिति॰ हिंगुवाह्लीकं॥ वाह्लीकंहिंगुरामठमित्यमरः। सिद्धमंत्रात्सुलंचा॥ मरिचेल्लादीप्यगंधासुरीसर्व
परामठइति॥ पिंड्राहिंगुपत्री॥ पृथ्वीकापृथुलापिंडारामठीचाक्षपत्रिकेतिकेयदेवः॥ समष्ठिलस्त्वपा
मार्गः॥ ठच॥ स्वन्नशठइति॰ करमर्दः सुषेणः॥ गुच्छः क्षीरीवकुरस्तः कंटकीकरमर्दकः॥ फलं साम्लंको
लमात्रं क्षुद्रं पक्वमिति॥ जंभीलो जंभलः॥ नागरंगः नारंगः॥ भव्यं कर्मरंगफलं॥ ग्राहीकपित्थः॥ तरुः कपि
त्थोऽम्लरसः कषायासितकः फलं॥ सितमामं कषायाम्लं पक्वं स्वादुसुगंधि च॥ सकपालं द्वयं तच्च महदम्ल
फलेभिदेति॥ चिंचावक्रफला॥ अम्लवाटिकाचांगेरी॥ पूतिकाष्ठमिति॰ सरलश्रीढा॥ देवदारु देवकाष्ठं॥

रामठं हिंगु निर्यासी तुषिण्डुयांना समष्ठिले। ठच॥ स्वन्नशठः करमर्दजम्भीले नागरंके पिभव्ये ग्राहि
म्लिया चिंचितिचि ग्रामाम्लवाटिकायां च॥ पूतिकाष्ठं तु सरले देवदारुणि नाष्ठयोः शाकश्रेष्ठानुजीवन्त्यांशा
कश्रेष्ठं च वास्तुके॥ ग्रान्ना॥ डुण्डु॥ क्ष्वेडावंशशलाकायामथ पुंसि हलाहले॥ लोहितार्कपर्णफलेच्छी

शाकश्रेष्ठेति॰ जीवंतीजीवनी॥ वास्तुकं वास्तूकं॥ ग्रान्ना॥ डुण्डुक्ष्वेडेति॰ वंशशलाकावंशघटिताश
लाका॥ हलाहलः विषं॥ हालाहलं हालाहलं वदंत्यपि हलाहलमिति द्विरूपकोषः॥ लोहितार्कप
र्णफलं रक्तकरविफलं॥ कृतवेधनं कोषवती॥ क्ष्वेडः कृतवेधनं च कोषवतीति हृदयदीयकः॥ कटुतोर
ईति लोके॥ क्ष्वेडरक्तरक्तार्कफले घोषपुष्पे दुरासदे इति लोचनः॥ ॥ ॥ ॥

शिवप्र॰
४१

स्वएउरति ज्यक्षुविकृतिः॥ अंघ्रिमलेः सुरसपाकविकारः॥ ह्यस्रोतसस्यसमत्वेंत्र्यंशा— किमत्ताफलाः॥ विका
राः फाणितगुडमत्स्यंडी खंडशर्करास्तिवोपदेवः॥ विश्वद्रेदोगंगेरुकी॥ गुडनशर्करीतिलोकेख्याता॥ अ
न्य सितकुसुमांवत्त्यामाकुशिलिड ह्मलः॥ गुडइति॰ फाणिः स्मारः॥ फाणिः स्त्रियां गुडक्षारो शकृतत्र्यंशमलेक्ष
वेरतिधर्मिष्टः॥ गंडोलस्यात्कुडःस्यादुरितित्रिकांडशेषः॥ हारहूराद्राक्षा॥ द्राक्षा तु गोस्तनी॥ मद्वीका
हारहूरा चेत्तिहैमः॥ वज्रकंटकःस्नुही॥ गंडीरस्त्वासिपत्रश्च गुडागुडाग्रपि चस्नुहीतिसिंहः॥ गुडोगोलेक्षु
विकृतौ स्नुहीगुडिकयोर्गुड इति रुद्रः॥ चएउन्ति॰॥ घोषा॥ शताह्वाकारवी घोषा सितछत्राऽतिछत्रिके

॥ खरतुः स्याद्दिक्षुविकृतौ विश्वदेव्यांतु योषिति॥ गुडः फाणोगुडप्हार हूरा यांच अकाएके॥ स्वएउ
घोषा चारेपुष्पं ई वच्यां क्रोधमूर्छिते॥ पवामांगंधमांस्यां च तिन्तिल्यांतुद्विलिङ्गभाक्॥ ॥

तिकेपदेवः॥ शताह्वा छिन्नरुहास्यात्पुच्छहानी लोरुगंधका॥ त्वरणको घ्रमजी राणुसरवा॰ कृष्णपिताह
शी॥ वीजकोषविशोषोऽत्रेति॥ जोरुपृथ्वी शंखाह्वा॥ रात्रिविकासित्वात्॥ द्रवन्ती शंवरी॥ माताभूमि
चरी चंडा शंवरी वकुट्यादिका॥ द्रवंतीचेत्यभिधानचूडामणिः॥ क्रोधमूर्छितः॥ कुकुल्लीनाधनहरीवि
रोकः क्रोधमूर्छित इति वाचस्पतिः चंडा धनहरी क्षेमदुःपुत्रगणहासकाऽस्त्यमरः॥ चंडास्व नामसख्या ४०
नारुषत्वफलमश्चोरकभेरोजमोदाकारदसैत्वाद्गिरोगतेऽस्त्वरणः॥ पवानीयवसाह्वा॥ पवानीस्याद्धम
धैवेति द्विरूपकोषः॥ गंधमांसी पूतना॥ तिन्तिणी चक्रफला॥ चंडो नामनितंतेली हृष्टेयमकिंकरदेस

योरित्तिमदिनी॥ मुक्ता चंडा च चुक्रिकेत्ति के पदेवः॥ ॥

पिण्डमिति॰ लोहमयः ॥ बलं बोल्लम् ॥ जयापुष्पं जवाकुसुमं ॥ सिह्लकः कपिः ॥ अलाबूस्तुंबी ॥ तनरं
नसं ॥ खर्जूः खर्जूरी ॥ वरावत्सारनी ॥ वरावत्सारनीपिण्डेति कोपानरं ॥ निशा हरिद्रा ॥ पृथ्वी हिंगुप
त्री ॥ भण्डीति॰ जिङ्गी मंजिष्ठा ॥ कूष्मांडः कुसुमफलं ॥ कर्कटी भित्तगागी ॥ मण्डइति॰ खुबेरंडः ॥ असि
क्थान्नरसः ॥ मंडो सिक्थः ॥ ससिक्था पेया ॥ परिसिक्था यवागूश्च ॥ घनसिक्था तु विलेपी ॥ परिस्रु
तस्त्वोदनो भक्तरसेति हृदयदीपकः ॥ मस्तु दधिजलं ॥ आमलकी धात्री ॥ शोण्डीति॰ पिप्पलीमागधी ॥

॥ पिण्डं लोहे बले पिण्डो जपापुष्पे च सिह्लके ॥ पिण्डा त्वलाबूनगरयोः पिण्डा खर्जूरवरानि
शि ॥ पृथ्व्यां च भण्डी जिङ्ग्यां ना कूष्माण्डे कर्कटीभिदि ॥ मण्डो रुबाव सिक्थान्नरसे क्लीवं
तु मस्तुनि ॥ आमलक्यां तु स्त्रियां शोण्डी पिप्पल्यां चविके पिचाण्डस्त्री ॥ एरण्डा मूषिका
क्कायां पुंसि तत्तानपत्रके ॥ द्राविडमिति विडलवणे स्त्रियां तु योनातु कर्चूरे ॥ ॥

चविकं चव्यं ॥ डस्त्री ॥ एरण्डेति ॥ मूषिका काकवन्द्री ॥ उत्तानपत्रक एरण्डः ॥ द्राविडमिति वि
डलवणमासुरं ॥ द्राविडं विडमासुरमिति धर्मिष्ठः ॥ त्रुटिः क्षुद्रैला ॥ सूक्ष्मैला द्राविडी बाला क्षु
द्रैला निष्कुटि स्त्रुटिरिति धर्मदासः ॥ कर्चूरो गंधमूलस्तु द्राविडो वेधमुख्यक इति माधव
ः ॥ कर्चूरकं दारं भावत्तु छदनस्तु एकरत्नं इति ॥ ॥ ॥

शिवप्रं० ८२

निर्गुण्डीति॰ इंद्रसुरासुरवारुणी॥ ऐंद्रीत्विंद्रसुराचित्रागवाक्षीसुरवारुणीमिद्रूदयदीपकः॥ निर्गुंडी शालिका
नालशेफाऽन्ययोः करहाटकइतिलोचनः॥ करहाटः शिफाकंदः॥ सिंदुवा॥ सिंदुवारः श्वेतपुष्पः सिंदुवः सिंदुव
रकः॥ शीतपुष्पः शीतसहरत्ति॥ निर्गुंडीकद्वयस्य विसंदला॥ गुल्मगुच्छाश्यसन्नस्यासितेति॥ मेउंडीतिलोकेख्यात॥
शेफालीपुष्पवर्षिणी॥ शेफालिकान्या निर्गुंडीवनके नीलमंजरीतिमाला॥ अन्यातादृशीतनुः शेफालिकेति॥ श्रृंगार
हारइतिवृन्दावनावनेप्रसिद्धा कथमितिरथाशेफालीषुसखलनकुसुमासुचेति॥ मत्स्यण्डीति॰ गंडदूर्वागंडिनी॥ गंडी

निर्गुण्डीन्द्रसुरायांकरहाटे सिन्दुकेच शेफाल्यां मत्स्यण्डीगण्डदूर्वायां संस्कृता इक्षुमलेक्षवे उच दीर्घदण्ड
सुगन्धर्वहस्तके च द्रुमोत्पले उन्नाः लाङ्गि कणोनास्सूक्ष्मधान्यांशे पिप्पलीजीरयोर्द्वयोः कृष्णंमरीचेलो
हेस्त्रीनीलीद्राक्षाकणासुच तीक्ष्णंमरिचकाकोलमूलकक्षारमुष्कके समुद्रलवणेलीवंपुंसितुक्षवकाभिधे

॥ इकारजक्षवंशवेतसाः कारपत्रा संततीक्ष्णाकुम्मादिसमीपिगायतइतिरूपनारायणः॥ संस्कृता इक्षुमलेक्षवः॥ मत्स्या
लादिसम्यकुपक्वा इक्षुमलेक्षुरसः॥ उच॥ दीर्घदण्डइति॰ गंधर्वहस्तकएरंडः॥ द्रुमोत्पलो दीर्घफलः॥ आरग्वधोदी
र्घफलोदंडपालो द्रुमोत्पलइतिधर्मिष्ठ॥ उन्नाः॥ लाङ्गि॥ कणइति॰ सूक्ष्मधान्यांशः॥ क्षुद्रतंदुलादिः॥ कणः स्या
तक्षुद्रतंडुलइतिहलायुधः॥ पिप्पलीमगधाशौंडीवैदेहीचपलाकणेतिधर्मिष्ठः॥ कणलवणक्वेलासर्षपालुद्र
नानीतिवर्द्धमानः॥ जीरोजाजी॥ जीरकोजरणोजाजीकणः स्याद्दीर्घजीरकइतिभावमिश्रः॥ पिप्पलीजीरकुंभीरमक्षि
कासुकणास्मृतेतिविश्वलोचनः॥ कृष्णमिति॰ मरीचमूषणं॥ लोहमयः॥ नीलीनीलिनी॥ द्राक्षागोस्तनी॥ कृष्णापिप्प

निर्गुण्डी ... मत्स्यण्डी ... पिप्पलीजीरयोर्द्वयोः ... कृष्णं मरीचे लोहे ...

काकोलतिक्तं ... मुष्कको मोक्षकः ... क्षारः॥ ...

पर्णमिति॰ पलाशं छदनं॥ पत्रं पलाशं छदनं दलं पर्णं छदः पुमानित्यमरः॥ सप्तपर्णो विशालत्वक्॥ स
मिद्वरः किंशुकः॥ पर्णः स्यात्पुंसि किंशुक इति लोचनः॥ क्षारश्रेष्ठः पलाशश्च बीजस्नेहः समिद्वर इ
ति धन्वंतरिः॥ उग्रगंधा जमोदा॥ खराह्वा कारवी पर्णी मोदा हस्ति मयूरक इति धन्वंतरिः॥ शम्याकश्च
तुरंगुलः॥ माहा हलीनलिका स्थिरा॥ त्रिपर्णी पर्णिनी पर्णी महाहलीनलिका स्थिरेति केषदेवः॥ बाणेति॰
नीलझिंटी नीलपुष्पसहचरः॥ इत्कटो मुंजः॥ वेणुरिति॰ इक्षुर्दीर्घपत्रः॥ वंशस्त्वक्सारः॥ शोणइति॰

पर्णं पलाशे पर्णः स्यात्सप्तपर्णे समिद्वरे॥ पर्णं तु उग्रगंधा शम्याक महाहलीनलिकासु च॥ बाणा
द्वयो नीलझिंट्यां बाण इत्कटके पुमान्॥ वेणुरिक्षौ च वंशे च शोणं हिंग्वोहविर्भुजि॥ शोणि
अरुणान्ति विषायां च हेमायां त्रिवृताभिधे॥ अलम्बुषा रक्तपादाद्यावृद्ध्यन्यथासु च यो[?]षिति॥

टिंटुः श्योनाकः॥ हविर्भुक् चित्रकः॥ शोणि॥ अरुणेति॰ अतिविषास्थूलकंदा॥ हेमा मंजिष्ठा॥ पद्मेन्द्र
गोपहेमा विश्वाख्या लोहित लोहितमिति वाग्भटः॥ त्रिवृताभिधः॥ त्रिवृता द्विविधं मूलं शोणितं श्याममेव
च॥ अरुणं त्रिवृदाख्यं तु श्यामं श्यामाह्वयं मतमिति॥ त्रिवृत्कुंभः कुटरणा त्रिभंडी त्रिवृता परा॥ श्यामाम
सूरविदलापालिंदी सरलातथेति हृदयदीपकः॥ अलंबुषा मुंडी॥ विश्वकमुंडी सुगंधिश्च कदंबा भफलाख्य

या॥ त्रिणकां॰ गुप्तिसंपत्रेति। रक्तपादाल्कर्णा

शिवप्र० उषणमिति० कणा पिप्पली ॥ मारीचं त्रिशिरोघ्नं ॥ अथ कत्तृणमिति० हलीमः केतकी हठः वारिपर्णी ॥ वारिपर्णीतो
४३ यपृष्ठे हठः पानीयपृष्ठजेति कैयदेवः ॥ किरातः किराततिक्तः ॥ रामकर्पूरः ध्यामकम् ॥ अथ गंधतृणे राम
कर्पूराख्ये हि कत्तृणं मिति सिंहः ॥ मालातृणं भूस्तृणं द्वे शतपुष्पोग्रगंधिनीति च सिंहः ॥ तत्र रामकर्पूराख्यं
43 वकुपुत्रकांडं कर्पूरगंध सुगंधि ॥ भूस्तृणं तु शतपुष्पिकावदुत्कटगंध भूलग्नमिति भेद इति मुकुटः ॥ जरणं
त्विति० रुचकं लघुगंधं ॥ कृष्णं कृष्णलवणं ॥ जीरमजाजी ॥ हिंगु रामठं ॥ तरुणमिति० कुब्जपुष्पं जलकुब्जकः ॥

उषणो षणोकणायां मूषणं मुषणं च मारीचे। अथ कत्तृणं हलीमे हठे किराते पि रामकर्पूरे। जरणो रुच
के कृष्णे जीरके ऽपि वा तु हिंगुनि ॥ तरुणं न स्त्रियां कुब्जपुष्पे पञ्चांगुले पुमान्। पूरणं पिष्टभेदे च पूरणी शा
ल्मलीद्रुमे ॥ वारुणी गंडदूर्वायां विशालाश्वेतयोरपि ॥ ब्रह्मणी ब्रह्मचारिण्यां फंजीमोहनयोरपि ॥ ॥

पंचांगुल एरंडः ॥ तरुणो यूनि नवके कुब्जपुष्पोरुबूकयोरिति लोचनः ॥ पूरणमिति० पिष्टभेदस्स्यष्टम् ॥
शाल्मली रक्तपुष्पा ॥ वारुणी नि० गंडदूर्वा गंडिनी ॥ विशाला इंद्रवारुणी ॥ श्वेता सुराभेदः ॥ पुनर्नवा शालि
पिष्टैः कृता श्वेता च वारुणीति कैयदेवः ॥ ब्रह्मणीति० ब्रह्मचारिणी ब्राह्मी ब्राह्मणी स्मारिणी ब्राह्मी मंडूकी ४३
ब्रह्मचारिणीति धर्मिष्ठः ॥ ब्राह्मी पिच्छिलापीतपुष्पिका ॥ भूसक्तावक्रधः शाखी द्वितीया तिक्तकामदु
: ॥ तृणवक्तृणका चेति ॥ फंजी भार्गी ॥ मोहना स्वक्षा ॥ ॥ ॥ ॥ ॥

रिङ्गिणीति० ॥ मगगंधामुद्गपर्णी वनजा प्रिंगिरिंगिणीति केयदेवः ॥ कंटकारी बृहती ॥ रोहणइति० चंदनं श्रीखंडः ॥ रोहणश्चंदनद्रुमइतिहारावली ॥ मलयस्तु स्यात्श्रीखंडो रोहणश्चसइति पुरुषोत्तमः ॥ कूट शाल्मलीः ॥ रोहितो लोहितो रक्तो रक्तघ्नः कूटशाल्मलिः ॥ प्लीहघ्नो दाडिमीपुष्पो रोहणः पारिजातकइति धर्मिष्ठः ॥ गोमयप्रियः ॥ भूस्तृणो गोच्छलः शृंगो रोहणो गोमयप्रियः ॥ विषाणीति० मदुराक्षीरकाकोली ॥ कूर्चपर्णी मेषशृंगी ॥ वृश्चिकाली मेषशृंगी कूर्चपर्णी विषाणिकेति केयदेवः ॥ कुष्ठं पारिभाव्य

॥ रिङ्गिणी मगगन्धायां कणेकार्य्यांचयोषिति ॥ रोहणश्चन्दने कूटशाल्मलौ गोमयप्रिये ॥
॥ विषाणी मदुराकूर्च्चपर्ण्योः कुष्ठे तु नद्वयोः ॥ श्रावणी श्रावणे मुंड्यां जटामांस्यां सुदर्शने ॥

म् ॥ श्रावणी श्रावणेइति० श्रावणी श्रावणमुंडीति हृदयदीपकः ॥ श्राविणी श्राविता पूर्वंगात्रेवेन महात्मना ॥ आत्रेयस्यैव चैकस्य तेन सा श्रावणी मतेति धान्वंतरीयाः ॥ जटामांसी भूतजटा ॥ मांसी माता भूताजटा जटामांसी तपस्विनीति धर्मिष्ठः ॥ सुदर्शनामुंडीतिका मांसीषु श्रवणां विदुरिति विश्वः ॥ सदर्शनः दध्याली० सुदर्शना सोमवल्ली चक्रांका मधुपर्णिका ॥ वत्सादनी चदध्याली मेचकामेयकातथेति

शिवप॰ श्रीपर्णीति॰ हवावारिपर्णी।मुद्रा।गंभारी॥ सप्तपर्णोविशालत्वक्॥ कटूफलः कटुफलः॥ कुंभीपाटला॥ शाल्मलीस्थि
४८ रायुः॥ पुंडरीकंसितांभोजं॥ अग्निमंथोऽरणिः॥ सरणीति॰ कुंडेमाध्वकः॥ सपरलीप्रसारणी॥ प्रसारणीसुप्रसरासा
रणीसरणीचसेतिकेयदेवः॥ सुषेणेति॰ त्रिवृताभित॥ मसूरविदलाकालाका॥ लमेषीसुषेणिकेतिकेयदेवः॥
आविघ्नः पाकरूपफलः॥ वानीरोवेतसः॥ लसनोमजरीनम्रः सुषेणोगंधपुष्पकइतिधर्मिष्ठः॥ सुपर्णइति॰
कृतमालकः शम्याकः॥ सुष्ठुपर्णान्यस्यः शोभनोवर्णोस्येतिचेतिरामाश्रमाः॥ कमलिनीनलिनी॥ पर्णः सप्तपर्णः॥

ग्रां १ ॥श्रीपर्णीतुहठेमुंजेसप्तपर्णेचकटूफले।कुम्भ्यांचशाल्मलौस्त्रीत्वंपुण्डरीकाग्निमन्थयोः।सरणीकुन्दसार
ण्योः सुषेणात्रिवृताभिदिपुंस्याविघ्नेचवानीरेसुपर्णः कृतमालके।सुपर्णाकमलिन्यांचसुपर्णीपर्णसौम्ययोःसुव
र्णाजोङ्गकेलीवकाञ्चनेहरिचन्दनेहरेणुः।स्त्रीरेणुकायांसतुपुंसिसतीनके।ण्याचा।चारुपर्णीभद्रपर्ण्यांचारु
पर्णोमुनिप्रिये॥ ॥

सौम्याशालिपर्णी॥ सुवर्णेति॰ जोंगकंअगुरु॥ कांचनंहेम॥ हरिचंदनंक्षुद्रचंदनं॥ हरेणुरिति॰ रेणुकाकौंतीस
तीनकंकलायः॥ प्रज्ञाघणिसातीनोपीतिमाधवी॥ त्रिपुटःखंडिकः सात्वावजवीजाकलापिका॥ श्यामोतिवर्त्तु
लः सस्यादंकटःसहरेणुकइतिसिंहः॥ कलायेपिहरेणुर्नारेणुकायांस्त्रियांभवेदितिरुद्रः॥ कलायस्त्रिकटः ४९
मोक्तः सतीनोवर्तुलोमतः॥ हरेणुरंकटोज्ञेयःइतिव्याडिः॥ णच॥ चारुपर्णीति॰ भद्रपर्णीप्रसारिणीप्रसारिणीसुप्र

सरासरणीसारिणीचसा॥ चारुपर्णीराजबलाभद्रप
र्णीप्रतानिनीतिकेयदेवः॥ मुनिप्रियः पलाशः॥ ॥

कोलोडुं॥कज्जलंकाककुम्भल्मितिकेयदेवः॥व्याडिस्तुइंदीवारमप्याह॥वरीशतावरी॥शतमूलीबहु
सुताभीरुरिंदीवरीवरीत्यमरः॥द्रोणीदीर्घवृंता॥करंभाकर्कशाद्रोणीदीर्घवृंतोत्तरेमोणी॥इंदीवरीसुगम
फलासुलोणीनीलिकाचसेतिकेयदेवः॥उदुम्बरइति॰हेमदुग्धः॥उदुंबरोहेमदुग्धोहरिताक्षोवसुकुम
इतिकेयदेवः॥सर्वधातुस्ताम्रं॥उदुंबरंरक्तधातुःकनीयःसर्वधातुकमितिकेयदेवः॥उपचित्रेति॰

रच इन्दीवरंकुवलयेवरीद्रोण्योस्तुयोषिति उदुम्बरोहेमदुग्धेसर्वधातौतुनद्वयोः उप
चित्रासुतश्रेण्यांद्राक्षायण्यांचयोषिति करभोरलौस्त्रीतुसरणीमत्स्यपित्तयोः क
लिम्बिकायांगोलाय्यांवर्षाभूमूर्वयोरपि॥

८ सुतश्रेणीद्रवन्ती॥द्राक्षायणीदंती॥करं
भरइति॰अरलुः॥करंभरोभूतवृक्षोभल्लूकर्षिहुकोरलुरितिकेयदेवः॥सरणीप्रसारणी॥
प्रसारणीस्यात्करंभरासरणीतिहृदयदीपकः॥मत्स्यपित्ताकटुी॥करंभराप्रसारण्यांरोहिण्यां
चगजयोषितीतिमेदिनी॥कलंबिका॥कलंबादत्याकलंबोनाडिकाकारःसुषिरोवक्रतोय
जइतिगोलाकुनटी॥वर्षाभूःपुनर्नवा॥मूर्वामधुरसा॥ ॥

कलिकारीति० विन्नशल्यागर्भपातिनी॥ करंजकः करजः॥ कर्णिकार इति० परिव्याधः काष्ठचंपक इतिरामः॥ व्याधिघातो दीर्घफलः॥ गणेरुः कनकपुष्पिका॥ कर्णपूर इति० वीतशोकोऽशोकः॥ नीलोत्पलमसितोत्पलं॥ कपीतनः पार्श्वपिप्पलः॥ कादम्बरीति० वारुणी श्वेता॥ पुनर्नवा शालिपिष्टैः कृता श्वेता च वारुणीति निघंटुः॥ दध्यग्रं दधिसरः॥ कादंबरं तु दध्यग्रे मद्यभेदे पि नद्ययोरिति से

कलिकारी विशल्यायां कलिकारः करञ्जके कर्णिकारः परिव्याध व्याधिघात गणेरुके कर्णपूरो वीतशोक नीलोत्पल कपीतने कादम्बरी तु वारुण्यां क्लीवं दध्यग्र मद्ययोः कृष्णसारो वालपत्रे शिंशपायां तु योषिति दीर्घनखां च भण्डीरेन क्लीवं वज्रकण्टके घनसारो ऽम्बुकर्पूरे दक्षिणावर्त्त पारदे॥

ष्वनः॥ मेदिनी तु दध्यग्रे पुंस्याह॥ कादंबरस्तु दध्यग्रे मद्यभे — दे नपुंसकमित्ति॥ दध्युत्तरो दाधेस्नेहो दध्यग्रः कट्वुरस्सर इति केयदेवः॥ मद्यमत्र हाला॥ कृष्णसार इति० वालपत्रः॥ खदिरः॥ शिंशपा मंडलपत्रिका॥ दीर्घनखी कालस्कंधा भंडीरः शिरीषः॥ वज्रकंटकः स्नुही॥ घनसार इति० आपः जलं॥ अप्शब्दो बहुवचनांतः स्त्रीलिंगः॥ कर्पूरो हिमवालुका॥ दक्षिणावर्त्त पारदः॥ पारदस्याग्निस्थापितत्वे सति दक्षिणावर्त्तेनैव भ्रमिरेतितद्धिदः॥ ॥ ८५

तुण्डिकेरीति। पिचुस्तूलः॥ बिंबी रक्तफला॥ तुंडिकेरी रक्तफला बिंबिका पीलुपर्ण्यपीत्यमरः॥ तोय
धर इति। सुनिषण्णश्चतुर्दलः॥ मुस्तामेघः॥ दीर्घपत्र इति। मधूलकः॥ मधूकोन्यो मधूलस्तु ज
लजो दीर्घपत्रक इति स्वामिपाठः॥ वञ्जुलं तरो वीरतरः॥ वेञ्जुलं तरोजगति वीरतरः प्रसिद्धः श्वेतासि
तारुणविलोहितनीलपुष्पः॥ स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः स्यात्कंटकी विजलदेश

तुण्डिकेरी पिचौ बिम्ब्यामपि तोयधरः पुमान् सुनिषण्णे च मुस्तायां
दीर्घपत्रो मधूलके वेञ्जुलन्तरे च लसुने वर्षाभूर्दीर्घवृक्षयोः कुम्भ
योनावभ्रपुष्पे पलाण्डौ गुडदारुणि॥ ॥

ज एष वृक्ष इति॥ वरवेल इति लोकोक्ति भावमिश्रः॥ दीर्घमूलः दीर्घपत्रः रहदातरस्ते कार्थ्याः॥
लसुनो रसोनः॥ वर्षाभूः क्षुद्रवर्षाभूः॥ वृश्चीवः क्षुद्रवर्षाभूर्दीर्घपत्रश्च कचिल्लक इति धन्वंतरिः॥ दी
र्घवृक्षो वंशः॥ कुंभयोनिरगस्त्यः॥ अभ्रपुष्पो वेतसः॥ अभ्रपुष्पश्च विदुलो रथः शीतश्च वेतस इति भा
वमिश्रः। पलाण्डुर्म्लेच्छकंदः॥ गुडदारुरिक्षुः॥

पयोधरइति॰ नालिकेरस्त्रिनेत्रः॥ वद्धं प्रार्थ्यते मदनविकलपाप्युवत्साभाति घ्नपुत्र कमपेति कथंवता
युः॥ घनानादरो भवति केन विराजते ज्ञवाप्यास्थि किंफलमुदाहर नालिकेरमिति विदग्धमुखमंडनं ना॰
अलिके॰ अरंइतिछेदः॥ प्रतिलोमेनुरंके॰ अलिनाइति छेदः॥ स्त्रियां च क्रीडां मिथो विदधते नवनालिके
र्यइत्यमरचंद्रः॥ नारिकेली इति च॥ यत्र नगरे॰ नारिकेली घटितमूलवंछ्या विपिनराजयइव राजवराज
यइति प्रभावतीहरणे चबैधां विठ्ठलकृष्णभट्टाः॥ नालिकेर इदंतोपि तथा दीर्घद्वितीयवान्निति द्विरूप

पयोधरो नालिकेरे मुस्तायां च कसेरुणि पारिभद्रः पारिजाते तिक्तके देवदारुणि
श्रीहस्तानुः शरपुंखे वनतिक्तकयोऽपुमान् पीतदारुः पीतकाष्ठे पीतायां देवदारुणि

कोषः॥ मुस्ताब्दः॥ कसेरु मुस्ताकृतिलोमशो मधुरो जलकंदः॥ पारिभद्रइति॰ पारिजातः पारिभद्रो
निंबतरुर्मंदारः पारिजातक इति भावमिश्रः॥ फरहद इति लोके॥ तिक्तको निंबः॥ अरिष्टः पारिभ
द्रः श्च हिंगुनिर्यासइत्यपीति भावमिश्रः॥ देवदारु देवकाष्टम्॥ श्रीहस्तानुरिति॰ शरपुंखः श्री
हस्तानुर्नीली वृक्षाभ गुल्मक इति भावमिश्रः॥ वनतिक्तो रोहितः॥ श्रीहस्तानुर्वनतिक्तश्च रो ८६
हित इति माधवः॥ पीतदारु रिति॰ पीतकाष्ठं दारु हरिद्रा॥ पीता हरिद्रा॥ देवदारु देवकाष्ठम्॥

मणिच्छिद्रेति॰ मेदाभेदः महामेदा। ऋषभोवृषभः॥ रक्तसार इति॰ पत्तंगं पट्टरंजनं॥ खदिरोदंतधावनः॥ रक्तचंदनं शोणचंदनं॥ वाजीकरीति॰ वाजिगंधा अश्वगंधा॥ विदारी विदारीकंदः॥ आमलकी धात्री॥ शतपत्रीति॰ भर्षं॰ महाकुमारीगंधाढ्या तत्सुष्पंभष मुच्यत इति॥ वरी शतावरी। सरोरुहं कमलं॥ श्रृंगवेरीति॰ वार्द्धिपत्री गोजिह्विका॥ कटुकंदं मार्द्रकं॥ स्मृतः सुरतरुरिति॰ देवदारु देवका

मणिच्छिद्रातु मेदायाभेदेपिऋषभेपिच रक्तसारस्तु पत्तङ्गे खदिरे रक्तचन्दने वाजीकरी वाजिगन्धाविदार्यामलकीषुच शतपत्री भवेच वर्यां शतपत्रं सरोरुहे श्रृङ्गवेरी वार्द्धि पत्र्यां कटुकन्दे तु नद्वयोः स्मृतः सुरतरुर्देवदारुण्यपि विकङ्कते सुकुमारा तु रम्भायां मनोज्ञायां शुकप्रिये पुंसिपुंड्राभिधाने क्षौ सीसकेसिक्थयोः॥ ॥ ॥

ष्ठः। विकंकतः स्रुवतरुः॥ वृक्षः कंटकारिकापरपर्य्यायः॥ सुकुमारेति॰ रंभा कदली॥ कदली सुकुमार च रंभाभानुफला मतेति धन्वंतरिः। मनोज्ञा वंध्या ककोटिकी॥ वंध्या ककोटिकी देवमनोज्ञा सुकुमारिकेति धन्वंतरिः। शुकप्रियः शिरीषः॥ पुंड्राभिधाने क्षुः इक्षुश्रेष्ठः प्रसिद्धः॥ सीसकं नागाभिधानं॥ सिक्थं मयणं॥ ॥

सुप्रसरेति० प्रसारिणी सरणी॥ हरिता दूर्वा॥ सूचिपत्रेति० केतकीकरपत्रपत्रा। शितिवारकः क्षेत्रभूषा॥ रयं
तमालपत्रमती० तापिच्छपत्रं-कालस्कंधस्तमालः स्यात्तापिच्छोपीत्यमरः॥ श्रीमान्तिलकः॥ पत्रकं त्रिगंधां
तःपाति-नच्चनागकेसरपत्राणीति॥ तमालपत्रकं पत्रं नाम संवस्त्रमंशुकमितिवैयदेवः॥ तमालपत्रकं पत्रं
तमालच्छदनं दलमिति धर्मिष्ठः॥ तालीसपत्रमिति० भूम्यामलकी भूधात्री॥ तालीसपत्रं तालीसमिति हृदयदी
पकः॥ स्याद्राजवदरमिति० रक्तामलकं॥ प्राचीनामलकं प्राचीनागरी चापि रक्तकमिति॥ लवणं पटु॥ सर्वतोभद्र

सुप्रसराप्रसारिण्यां हरितायामपि स्त्रियां। सूचिपत्रा च केतक्यां स्त्रियां नाशितिवारके रय
म् तमालपत्रं तापिच्छपत्रे श्रीमति पत्रके तालीसपत्रं भूम्यामलकी तालीसयोर्मतम् स्या
द्राजवदरं रक्तामलके लवणेपि च सर्वतोभद्र उक्तो नानिम्बे मुद्यां तु योषिति रषट् रसाय
नवरा धात्री जीवन्ती त्रिफला सु च पुनर्नवा काकमाच्योः क्षीवं पयसि सर्पिषि रान्ताः॥

इति० निंबः पिचुमंदः॥ मुद्गी काश्मरी॥ श्रीपर्णी सर्वतोभद्रा काश्मीरी काश्मरी मुद्गीति वैयदेवः॥ रषट्॥
रसायनवरेति० धात्री आमलकी॥ जीवंती स्वर्णनालिका॥ त्रिफला फलश्रेष्ठा॥ फलोत्तमा फलश्रेष्ठा त्रि
फला च फलत्रयं। वरा रसायनवरा सा च धात्री विभीतकैः॥ लवंगमालती सस्यक्रमुके त्रिफला च चित्र
द्राक्षा परूषकाश्मर्यफलैः क्वापि फलोत्तमेति वैयदेवः॥ त्रिफलात्र फला पि चेति द्विरूपकोषः॥ त्रि
फला शब्दः समनार्थस्त्रिफलाशब्द इति द्विगोरिति सूत्रे रक्षितः॥ पुनर्नवा शटी॥ काकमाची काका॥ प

॥ ॥ फलत्रयं समर्थ्यद्वितिम्॥ राजतः॥

तामलकी अनेनैव नाम्ना प्रसिद्धेत्याहुः ॥ नन्दनं हरि

लद्धि ॥ अम्लीति० चांगेरिका अम्लपत्रिका ॥ क्षुद्रा तु चांगेरी सुदाम्ला चाम्ललोणिकेति हारावली ॥ अम्लि
कीवक्रफला ॥ अम्लवेतसः ॥ कालइति० कासमर्द्दकः शासूषाभेदः ॥ कसौंदीति ख्यातः ॥ मोघा पाटला त्रि
वृत्तश्यामा ॥ दोलानी लिनी ॥ मंजिष्ठा चिकसा ॥ कृष्णजीरकः उपकुंचिका ॥ गंगेरु नागबला ॥ कदली रंभा ॥ कु
लीति० उद्दाले वनकोद्रवः कंटकारी० कुली क्षुद्रा निर्द्दग्धेति वैयरदेवः ॥ ढंढणो हृक धूमकः ॥ वारिपर्णी तोय
वृक्षोहठः पानीयपृष्ठजा कुली कुंभी तोयपुष्पं आढंढणोहृकधूमक इति वैयरदेवः ॥ वदरी भिंत कोली ॥ कोली

लद्धि अम्लीचांगेरिकायां स्यादम्लाम्लिकां स्त्रियामुभे अम्लोम्लवेतसे पुंसि कालः स्यात्कासमर्द्दके
कालमोघा त्रिवृद्दोलाम मंजिष्ठा कृष्णजीरके गांगेरुकां चाथ काली स्यात्तरस्यामथो कुली उद्दालेक
एटकायां च ढंढणे वदरी भिद्दि कोली कोलिश्च कर्कन्धुश्च तत्फले तु नपुंसकं कंकोलके च कोला तु पि
प्पली चव्ययोस्त्रियां चलस्तुरुष्के चाम्पेयेऽतलं वालकनीरयोः जालीतु घोषके जालो नीपे तालस्त्व
लेद्रुयोः तामलक्यां तु ताली स्यात्तालं तु नटमण्डने ॥

इति० कोलिश्चेति० कर्कंधूर्वदरी ॥ तत्फलेतयोः
फले ॥ कंकोलकं उत्तं ॥ पिप्पली कणा ॥ चव्यं चविका ॥ चलइति० तुरुष्कः शिलारसः ॥ चाम्पेयः सुरभिः ॥ चां
पेयश्चंपकोरम्भः शीतलः सुरभिश्चलइति वैयरदेवः ॥ जलमिति० वालकं क्लीवेरं ॥ नीरमुदकं ॥ जालीति० ता
लीच नेत्रुनिम्नतस्थितकर्णतालाः इति ॥ नीपकदम्बः ॥ तालइति० तद्वो लेख्यपत्रः प्रसिद्धः ॥ तृणराजो
दीर्घतरुः लेख्यपत्रो द्रुमेश्वर इति नाममाला ॥ तालीइति च ॥ तामलकी वदरफलकेति जेटुटः ॥ चंदनं इत
तालमलं तालं वर्णकं नटमंडनमिति माधवः ॥ ॥

ल्मः० अजरा वक्रपत्रा च भूधात्री तामलकपीतिते त्रांत
रवचनवले न भूधात्रीतितत्स्याः पर्यायं दर्शयति ॥ अम्ले तु

तूलइति॰पिचुः कर्पासः॥ब्रह्मदारौ पिचौ तूलमिति त्रिकांडशेषः॥पुल्लिंगस्तु पिचौ तूलः स्त्री वं
स्या ब्रह्मदारुणीति रुद्रः॥ब्रह्मदारु ब्रह्मनिघंटु॥तूत इति लोके॥तैलमिति॰ कल्कः सिक्थकैः॥तिलस्नेहः
प्रसिद्धः॥नलइति॰पोटलः नज नलिनं कमलं॥नलीक पोनचरणा॥कुनटी मनः शिला॥नाल
मिति॰नाला इति च॥पद्मदंडः कमलवृंदुः॥शाककलंबकः॥कलंबो नालिकाकारः सुषिरो वकु
तोजयः॥नाडिकातस्मात् स्यात् सुषिरा च॥फलमिति॰जातीफलं जातिकोषः॥फलं लाभे जाति को

तूलोनस्त्रीपिचौ तूलं स्त्री वंस्या ब्रह्मदारुणि तैलं कल्के तिलस्नेहे नलः पोटगलेन लम् नलि
नेप्यनलीनद्यां कुनद्यामपि योषिति नालं नालापद्मदंडे नाली शाककलम्बके फलं जातीफ
ले पूगे मदने च फलत्रिके कङ्कोले च फली गन्धफल्यां चम्पककोरके फलः रुद्र्वचलंगन्ध
रसे बाद्याल के च लावङ्गस्तु शिम्बि धान्यस्य भेदे स्त्री दीप्यधीरयोः॥

((बिवाणाग्रे फलके पि चेति
रुद्रः॥पूगमुद्वेगं॥मदनं मदनफलं॥फलित्रिकं त्रिफला॥कंकोलं कंकोलीफलं॥गंधफली प्रियंगुः॥चं
पककोरकः चंपककलिका॥कल्पः करमर्दः॥करमर्दश्च कल्पश्च फलम् पाकश्च सस्मर इति सिंहः॥
वलमिति॰ गंधरसो बोलः॥बाद्यालकः शीतकुंचिका॥ वङ्गर इति॰ शिंबि धान्यभेदः॥निष्पावो व
ल्लको मत इति केयदेवः॥दीप्याजमोदा॥धीराशतपत्रीभेदः कुञ्जकाख्यः कूपकः कुंजकी वल्ली कुमारी

चालइति॰ आचमनं ह्रीवेरं॥ ह्रीवेरं बालकं वारि वज्रमाचमनं कचमिति केयदेवः॥ यूथी बालपुष्पा ॥ वालेला त्रुटिः॥ भल्लीति॰ भल्लातके ऽरुष्करः। अरुल्लुर्भल्लूकः॥ शालइति॰ अक्षिपीलुकोद्देश्नकाः रोमकोरम्भको द्देश्न का शाकाश्शालोऽक्षिपीलुकइतिनिघंटुः॥ सर्जको ऽश्वकर्णकः॥ सालेतु सर्ज्जकार्य्या श्वकर्णकाः सस्यसंवरइत्यमरः॥ शालपर्णी त्वत्र तालव्यशो ऽपीत्येके इतिरामाश्रमाः॥ शालो हालन्यमत्स्यप्रभेदे सर्ज्जपादये॥ शालाग्रहे तरुस्कंधशाखागारैकदेशयोरिति विश्वः॥ चारोमुनिप्रियः॥

वालोस्त्रियामाचमने यूथीवालेलयोः स्त्रियाम् भल्लीभल्लातके भल्लोरल्लो शालोऽक्षिपी लुके सर्ज्जेचारेपि शालुस्तु कषायद्रव्यचोरयोः शिलामनःशिलायां च शिलाजतुनिगैरि के शैलं ताक्ष्यं च शैलेयेसालोवरणसर्ज्जयोः लत्रि अनलोरुष्करे चित्रेऽपि॥ ॥

शालुरिति॰ कषायद्रव्यं कषायरसयुक्तद्रव्यं। चोरो निशाचरः॥ शिलेति॰ मनःशिलाकुनटी॥ शिलाजतुशिलाधातुः॥ गैरिकं गिरिजम्॥ शैलमिति॰ तार्क्ष्यं तार्क्ष्यशैलं॥ शैलेयं शिलापुष्पं। शैलेयनद्येषु शिलातले ब्धितिकुमारः॥ सालइति॰ घरलो भ्रमरवंधुः॥ सर्ज्जश्री हा॥ सालोवरणसर्ज्जयोरिति रंतादैारभसः॥ सालकाननशोभीनीतिदंडी॥ लत्रि॥ अनलइति॰ अरुष्करो भल्लातः॥ चित्रोऽग्निकः॥ ॥ ॥

शिवप्र॰ उद्दालइति॰ वनकोद्रवः वनकोरदूषः॥ व्रीहिभेदः॥ वनकोद्रवाकारतंदुलइतिसिद्धमंत्रप्रकाशः॥ वरकोद्दा

८९ लकोऽक्षालचीनइत्यारदर्दुरारइतिवाग्भटश्च॥ कोविदारः कांचनारः॥ मधुभेदः उद्दालाकृतंमधु॥ उत्पल

मिति॰ पुष्परं पुष्करमूलं॥ कुष्ठ पारिभाव्यं॥ कमलमिति॰ जलजमब्जं॥ जलं पानीयं॥ कमलोत्तरसंज्ञीनमी

नहंसाम्भघट्टेनेदितिसंग्रहः॥ ताम्रं सर्वधातुः॥ कपिलइति॰ चित्रोऽग्निकः॥ कौंतीरेणुका॥ शिंशपामंगुलय

त्रा॥ कदलेति॰ कदलीव॰ पृश्नीवारिपर्णीकुंभीहठइतिसमानार्थाः॥ काष्ठीलिकारण्यरंभा॥ कदलश्च

उद्दालो वनकोद्रवे व्रीहिभेदे कोविदारे मधुभेदे च नद्वयोः उत्पलं पुष्करे कुष्ठे कमलं जलजे जले ताम्रे

च कपिलश्चित्रे कौंती शिंशपयोः स्त्रियाम् कदलाकदली पृश्न्यां कदली कदलावपि काष्ठीलिका

यां कदला शाल्मलीभूरुहेपि च करालाकालमालायां तैले सर्ज्जरसस्य च पुमान् क्लीबं तु रोध्रे स्यात्क

ट्फलः सोमवल्कले कट्फलात्कलयं तायां कन्दलो भिनवोद्भिदि स्त्रीरम्भाभूमिकन्दल्योः॥

कदल्यसावितिमाधिः॥ शाल्मलीभूरुहः स्थिरायुः॥ करालेति॰ कालमालाकुठेरकः॥ सर्ज्जरसश्चीढा॥

रोध्रः शाबरः॥ कट्फलइति॰॥ सोमवल्कलः इवती॥ कृष्णाङ्गनापाटला॥ कन्दलइति॰ अभिनवोद्भित

नवांकुरः॥ कंदलः कलहेयुद्धे नवांकुरकपालयोरितिलोचनः॥ मयादृष्टः पालितं लिनत्ववलीकंदल

निभइतिभवभूतिः॥ रंभाकदली॥ ध्वजांशुकैस्तद्भितिकंदलीदलइति माघः॥ भूमिकंदली॥ द्रोणप

ली॥ स्निग्धकंदाकंदली भूमिकंदलीति शब्दार्णवः॥ कंदलीश्वेतश्लक्ष्णवज्रपुटः कंदविशेषः सर्पछत्र ८९

शि॰ ... ॥ ... ॥

कालोलरति॰ विषंक्ष्वेडः॥ काणा वीरा॥ कीलालमिति॰ कुंकुमं धीरं॥ वाल कंवारि॥ कुवलमिति॰ उत्प
लंकमलं मुक्ताफलंमौक्तिकं॥ कुवलीकर्कंधूः॥ वदारा कुवलीचकर्कंधूरितिहलायुधः॥ कुंडलीति॰
आरग्वधः संपाकः॥ कंदरो हिलीगुडूची॥ कोविदारः कांचनारः॥ कुटिलेति॰ दवीस्टक्का॥ जिह्मंतगरं॥ ग्रंथि
लइति॰ गोक्षुरस्त्रिकटः॥ विल्वः शांडिल्यः॥ करीरोगूढपत्रः॥ विकंकतः वृक्षकंटकादिका॥ गोरिलइति॰
कटुस्नेहः सर्षपतैलं॥ लोहचूर्णमयोरजः॥ चक्रलेति॰॥ गुंजाकाकणंति॥ छत्रमुस्तमुस्ताभेदः॥ यच्छत्रमुस्त

काकोलोजलस्त्रियांविषेकाणायांस्यथकीलालंकुंकुमेवालकेपिच कुवलंतूत्पलेमुक्ताफलेपिकु
वलीफलेकुण्डल्यारग्वधेकन्दरोहिएपामप्यथद्वयोः।कोविदारेचकुटिलादेवांजिह्मेतुनद्वयोः ग्र
न्थिलोगोक्षुरेविल्वेकरीरेचाविकङ्कते गोरिलस्तुकटुस्नेहेलोहचूर्णेपिचक्रला गुञ्जायांछत्रमुस्तेच
चपलःसूतसिद्धयोः शौण्ड्यांपोषितिचूडालागुञ्जायांछत्रमुस्तके॥ जगलःपिष्टमद्ये चमेदकेमद

कंत्वत्र चूडाला चक्रलोच्चटेति सिंहः॥ चपलइति॰ सूतः पारदः॥ रसेंद्रःपारदः सूतः पारदश्चपलोपि
चेति धर्मिष्ठः॥ सिद्धः शिलारसः॥ शौंडीपिप्पली॥ चूडालेति॰ गुंजारक्तिका॥ छत्रमुस्तकंमुस्ता
भेदः॥ जगलइति॰ विष्टमद्यं पिष्टकृतं मद्यं॥ मेदकोजगलादधःस्थोमद्यावयवः॥ किण्वंवक्क
समेदकजगलाः कादंवरीप्रसन्नेचवक्षुषाःसमाद्रीसाद्रासमद्रवाः नमोद्ध्रंगामधे॥ समोत्रपू
र्वेनिरावस्थासाधारणः॥ मदनद्रुमोराढः॥ ॥

जटिलेति० उग्रा वचा॥ नलदमुशीरं॥ जंभल इति० दंतहर्षणो जंबीरः॥ अबद्धोरूपिका॥ जम्बूल इति० श्या
मपत्रः॥ जंबुविटपः॥ हलीमकः क्रकचच्छदः॥ जंबूलो जंबुविटपे जंबूलः क्रकच्छद इति लोचनः॥ तरल इति०
धत्तूरः कनकाह्वयः॥ यवागूः परिसिक्थ्या॥ सुरा मद्यं॥ तमाल इति० तिलकः श्रीमान्॥ कालस्कंधस्ता
पिच्छः॥ वरुणद्रुमः सेतुवृक्षः॥ तण्डुल इति० धान्यनिकरः धान्यसमूहः॥ वेल्लं विडंगं॥ तंडुलश्च क्रिमिघ्नश्च

जटिलोग्रा नलदयो जम्भलो दन्तहर्षणे जम्भलो वर्बूपि जम्बूलः श्यामपत्रे हलीमके तरलः सुरा
धत्तूरे यवागू सुरयोः स्त्रियाम् तमालस्तिलके ताऽपि स्कन्धे च वरुणद्रुमे तण्डुलो धान्यनिकरे
वेल्लेतण्डुलम स्त्रियाम् ताम्बूली नागवल्ल्यां च ताम्बूलं क्रमुकीफले नकुलीकुक्कुटी मांस्योरथ
स्यान्नाकुली स्त्रियाम् रास्नाभित्कुक्कुटीकन्दचव्यके चाक्षपीडके निचुलः स्थलसम्भूतवेतसे
चाम्बुवेतसे॥ ॥

त्यमरः॥ क्रिमिघ्नं तंडुलं मोघेति वाचस्पतिः॥ ताम्बूलीति० नागवल्ली प्रसिद्धा॥ क्रमुकीफलं सुदे
गः॥ नकुलीति० कुक्कुटी वल्ली कन्दः स च व्याख्यातः॥ मांसी जटामांसी॥ नाकुलीति० रास्नाभित
। नाकुली सर्पगंधा च सुवहा भोगिगंधिका। सर्पाक्षी नकुलेष्टा चेति भावनामगुणमालायां॥ ना १०
ड इति लोके॥ कुक्कुटीकंदो व्याख्यातः॥ चव्यं चविका॥ अक्षपीडकः शंखिनी॥ निचुल इति० स्थल
वेतसः स्पष्टं॥ वानीरे कपिभेदे स्यान्निचुलः स्थलवेतसे इति शब्दार्णवः॥ वेतसः हिज्जलः॥ ॥

नेपाल इति० इक्षुभेदे ऽनेनैव नाम्ना ख्यातः ॥ शतपर्वककान्तर नेपालाद्यास्ततः क्रमादिति वाग्भटः। सुवहा रास्ना शिला कुनटी ॥ नेपाली कुनटी गोला शिलादि औषधिः स्मृतेति निघंटुः। मनोज्ञा शिलागंधिका। नेपाली चेति केयदेवः। पललमिति० कर्दमो जंबालः ॥ पलमामिषं ॥ तिलपिष्टं तिलकल्कः ॥ प्रवालइति० किसलं किसलयं। नवेत्यस्मिन्किसलयं किसलं पल्लव इति हैमः ॥ अथ पल्लवः। किसलं किसलं चेति त्रिकांडशेषः ॥ पल्लवो ऽस्त्री किसलयमित्यमरः। किसलयैः सलयैः सलयैरितिरघुयमकादृ

नेपालस्यादिक्षुभेदे सुवहायां तु योषिति शिलायां च मनोज्ञायां पललं कर्दमे पले तिलपि
ष्टे प्रवालो ऽस्त्री किसले विद्रुमद्रुमे पाटला पाटलितरौ पुष्पे स्याः पाटलं त्रिषुः पाटली पाटलायां।
स्यादाशुव्रीहौ तु पाटलः पिप्पलः केसवावासे पिप्पलं सर्वतोमुखे पिप्पली त्वूपकुल्यायाम् ॥

स्यमध्याः ॥ प्रवालो ऽस्त्री विद्रुमे नवपल्लवइतिलोचनः ॥ विद्रुमद्रुमो ऽग्र्यावववल्लरी ॥ पाटलिः पाटलामोघे त्यमरः ॥ अस्याः पाटलायाः पुष्पे वाच्ये त्रिषु त्रिलिंगः पुष्पे क्लीवे ऽपि पाटलेत्यमरः। अपिशब्दात्स्त्रीत्वं चेति रामाश्रमाः ॥ पाटलः कुसुमे वर्णे ऽप्याशुव्रीहिश्च पाटल इति शाश्वतात् पुल्लिंगश्च। पाटलायां पाटलीत्यपि। आशुव्रीहिः आशुपाकी व्रीहिः ॥ आशुव्रीहौ पाटलो नाम्नेतरत्रोन्य लिंगवानिति रुद्रः ॥ पिप्पल इति० केशवावासश्चलदलः ॥ सर्वतोमुखं सलिलम्। पुष्करं सर्वतोमुखमित्यमरः ॥ ॥ रूपकोश

शिवप्र०
९१

पिचुल इति० रक्तलो जलवेतसः॥ पिचुलो झावुके पुंसि निचुले जलवायस इति लोचनः॥ तेन तवर्गपंच मादिरपीति सिद्धम्॥ वानीरः कृपिभेदः स्यान्निचुलः स्थलवेतस इति शब्दार्णवः। स्यानादस्मात्सर सनिचुलादुत्पलोदग्रखः खमित्यभियुक्तप्रयोगाच्च॥ पिच्छिल इति० द्विजकुत्सितः श्लेष्मातकः॥ तू लिनी शाल्मली॥ कृष्णसारा शिंशपा॥ पोतिका उपोदिका॥ भव्यं कर्मरंगफलम्॥ पिंगलेति० रुचीरो

पिचुलस्त्रिकृष्णे नरि झावुके वंवुके चापि पिच्छिलो द्विजकुत्सिते तूलिन्यां कृष्णसारायां पोतिका यां च पिच्छिला भव्योली वं पिङ्गला तु रुचौली वं तु पत्रके पिञ्जला तोयपिप्पल्यामारकूटे तु पित्तल म् फेनिलः स्यादरिष्टे पि फेनिलं वदरीफले मदने वकुले लायां नीलिन्यां महिला स्त्रियाम् गु न्द्रायां भस्मगन्धिन्यां मातुलः कनकाह्वये फले राव स्य भङ्गायां मातुलानी च मातुली॥

चना॥ पत्रकं तमालपत्रम्॥ पिञ्जलमिति० तोयपिप्पली जलपिप्पली॥ आरकूट रीतिः॥ पादेन रसकेनाद्धं तत्सत्वेनाथवा युतं॥ अंतर्धूमं द्रुतं शुल्बं पिञ्जलं स्वर्णसन्निभमिति। फेनिल इति० अ रिष्टो रक्षावीजः॥ वदरीफलं कोलं॥ मदनः मदनफलं। वकुलेति० एला द्राविडी॥ सूक्ष्मैला द्रा विडी तु स्यात् गौरांगी वकुला त्रुटिरिति धन्वंतरिः॥ नीलिनी नीली॥ महिलेति० गुंद्रा प्रियंगुः। भस्म गंधिनी रेणुका॥ मातुल इति० कनकाह्वयो धत्तूरः॥ राव मदनफलं॥ भंगा विजया॥ ॥ ॥ ९१

मुसलीति॰ तालमूली हिरण्यपुष्पी ॥ आखुकर्णी द्रवन्ती ॥ सितकंगुः श्यामटी ॥ दृत्यमधुः ॥ मुसखण्डने ॥ मूर्द्धन्यमध्योप्ययमितिवर्णदेशना ॥ मुसखंडन इतिधातो दंत्यांतेषु मूर्द्धन्यांतेषु चवोपदेवात्रेयादिभिः पठितत्वात् ॥ उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः । अतएवमुसलोमुशलोपि चेति द्विरूपेषु विश्वः । मृणालमिति॰ नलदमुशीरं ॥ विसमंमृणालं ॥ रसालेति॰ सुरसाशिखरिणी ॥

मुसलीतालमूल्याखुपर्णिका सितकङ्गुषु मृणालंनलदेक्लीवंपुन्नपुंसकयोर्विसे
रसालासुरसादूर्वाविदारीगोस्तनीषुच रसालंसिह्लकेचालेरसालः पौंड्रचूतयोः ॥

तद्व्रक्षणं तु ॥ अर्द्धाढकं त्वचिरपर्युषितस्य दध्नः खंडस्य षोडशपलानि शशिप्रभस्य ॥ सर्पिः पलंमधुपलंमरिचंद्विकर्षं शुंठ्याः पलार्द्धमपि चार्द्धपलं चतुर्णां ॥ श्लक्ष्णेपटेललनया मृदुपाणिघृष्टाकर्पूरवाससुरभीकृतभांडसंस्था ॥ एषा वृकोदरकृता सुरसा रसाला या स्वादिता भगवतापुरुषोत्तमेन ॥ दूर्वा हरिताली ॥ विदारी विदारीकंदः ॥ गोस्तनी द्राक्षा ॥ सिह्लकः शिलारसः ॥ वालो गंधरसः ॥ पौंड्र इक्षुभेदः ॥ चूत आम्रः ॥ ॥

शिवप्र॰ ९२

लाङ्गलीति॰ लाङ्गलं च॥ चोचनालिकेरः॥ पृश्निपर्णी॥ शृगालविन्नाघ इति लांगलीपर्णिकामता॥
पृश्निपर्णी चेति केयदेवः॥ कं च रं जलपिप्पली॥ विशल्या कलिकारी॥ वल्कलेति॰ गुडत्वक् भृंगं॥ तेजोव
तीते जिनीति तेजोवल्यः लिकेति समानार्थाः॥ वञ्जुल इति॰ तिनिशः स्यंदनः॥ अशोको वीतशोकः॥ वेतसोन
म्रकः॥ शीतो वानीरो वंजुलस्तथेति॥ विमलेति सातला सिक्रूंडः॥ पद्मकाष्ठं पद्मवर्णी॥ विदुल इति॰ अम्बुवेत
सः वेतसाम्लः॥ वेतसो नम्रकः॥ श्यामल इति॰ चदेलेलः पिप्पलः॥ लवली फलं राजवदरं॥ शाल्मलीति॰

लाङ्गली लाङ्गलं चोचे पृश्निपर्ण्यां तु लाङ्गली कच्चटे तु विशल्यायां वल्कला तु गुडत्वचि तेजोवत्यां व
ञ्जुलस्तु तिनिशाशोकवेतसे विमला सीतलायां स्यात्पद्मजः पद्मकाष्ठके विदुलस्तु पुमानम्लवे
तसे चापि वेतसे श्यामलः स्याच्चलद्दले श्यामलं लवलीफले शाल्मली रक्तपुष्पायां तदाख्या
वे तु शाल्मलः। शीतलं पुष्पकासीसे कर्पूरे मलयोद्भवे शैलजे च पुमान्हेमपुष्पे मरिचपत्रके
श्रीफली नीलिका धात्र्योर्ना बिल्वे चिक्कणे द्वयोः शीवलं स्याच्च शीवाले शैलेये च नपुंसकम्॥

रक्तपुष्पा मोचा॥ तदाख्या वो मोचरसः। शीतलमिति॰ पुष्पकासीसं भूमिजो धातुः॥ कर्पूरं हिमं॥ मल
योद्भवं चंदनं। शैलजं पलितम्॥ हेमपुष्पश्चंपकः। मरिचपत्रकः॥ शालः॥ शालः सर्ज्जः सर्ज्जरसः कांतोम
रिचपत्रकः॥ शाकाङ्कुरस निर्यासः श्रीकरः शीतलस्तथेति केयदेवः। श्रीफलीति॰ नीलिका रंजनी॥
तुत्था श्रीफलिका मेलासार वाही च रंजनीति निघंटुः॥ धात्री आमलकी॥ बिल्वं शैलूरवः॥ चिक्कणः ९२

पूगः॥ शीवलमिति॰ शीवालः शैवलः॥ शैलेयं शि
शिलापुष्पं॥

शैवलइति॰ शैवालः शीवलः ॥ पद्मकाष्ठं पद्मवर्णी ॥ सरलइति॰ पूतिकाष्ठं देवदारु ॥ त्रिवृद्भित्-कृष्णात्रि
वृत ॥ श्यामाममसूरविदला पालिंदी सरलातथेतिमृदयदीपकः ॥ केचित्सरले त्याकुः ॥ सप्तलेति॰ ग्रै
भिकानचमालिका ॥ भूरिफेनासातला ॥ चूडामणि गुंजा ॥ हिङ्गुलइति॰ वर्णकइत्यं हंसपाकाख्यं ॥
मंटाकीकंटकारी ॥ लच ॥ अम्रणालइति॰ उशीरं नलदं ॥ दीर्घमूलं वीरणं ॥ एकाष्ठीलेति॰ पापचेली
वनतिक्ता ॥ बुकोवकपुष्पः ॥ शिवमल्ली पाशुपत एकाष्ठीलो वको वसुरित्यमरः ॥ एकाष्ठीलावनति

शैवलः पुंसि शैवाले स्त्रीचं स्यात्पद्मकाष्ठके सरलः पूतिकाष्टे स्यात्सरलातु त्रिवृद्भिदि सप्तला
ग्रैभिकाभूरिफेना चूडामणिश्चपि हिङ्गुलो वर्णकश्चैव नाभलगु मांतु हिङ्गुलीलच अम्रणाल
मुशीरं स्याद्दीर्घमूले वनद्वयोः एकाष्ठीला स्त्रियं पुंसि पापचेल्यां बुके क्रमात् कन्दरालः पामा
गर्दभाण्डे प्लक्षतरावपि अथ कर्षफलो धात्र्यां विभीतकतरावपि क्षीरवल्ली हेमदुग्धा विदारी
क्षीरिणी स्नुच अथ गन्धफली फल्यां चम्पके स्याच्च कोरके ॥ ((कौषधो पुंसि वकपुष्पेरति ॥ वाकुल
इति स्याताकभेद इति वृद्धाः ॥ कन्दरालइति॰ गर्दभांडः सुपार्श्वकः ॥ गर्दभांडे कंदरालकपीतनसुपा
र्श्वकाइत्यमरः ॥ प्लक्षतरुः पर्कटी ॥ अथ कर्षफलइति॰ धात्री आमलकी ॥ विभीतक विभीतकत
रुः क्षसहस्वक्षीरवल्लीति॰ हेमदुग्धा हेमक्षीरी ॥ विदारी विदारीकंदः ॥ क्षीरिणी दुग्धिका ॥ अथग
न्धफलीति॰ फली प्रियंगुः ॥ प्रियंगुः फलिनी फली ॥ चंपककोरकः चंपककलिका ॥ कोरकजालक

कलिका कुयलमुकुलानि तुल्यानीति हलायुधः ॥
प्रियंगौ स्त्री गंधफली चंपकस्य च कोरकइतिरुद्र ॥

गन्धमूलेति॰ पद्मनाडी पुष्करपर्णी॥ सुरभी रास्ना॥ द्राविडः कर्चूरः॥ ताम्रमूलेति। दुरालंभा दुरालभा
। समंगा मंजिष्ठा॥ अंजलिकारको लज्जालुः॥ तोयवल्लीति॰ अंबुसुषवी पलाशिका हृस्ववल्लीति
यवल्लीति॰ हृस्वफलापिच्चकारवल्ली वारवल्ली सुषवी सुकुमारिकेति केयदेवः॥ लांगलिकी जलपि
प्पली॥ दन्तामलमिति॰ फलिञ्जको मरुवकेवेः। दमनः पुष्पचामरः॥ दीर्घमूल इति॰ यवासको यो
सः॥ स्थिरा शालिपर्णी॥ गोपी सारिवा॥ वेल्लन्तरो वीरतरः। उशीरमित्येके। शरो बाणः॥ प्राचीवल

गन्धमूला पद्मनाड्यां सुरभौ द्राविडे पुमान् ताम्रमूला दुरालम्भा समङ्गाञ्जलिकारके तोय
वल्ल्यम्बुसुषवी लाङ्गलिक्यां दन्तामलम् फलिञ्जके च दमने दीर्घमूलो यवासके दीर्घमूला स्थि
रा गोप्योः स्त्री च वेल्लन्तरे शरे प्राचीवलो म्बुपिप्पल्यां काकाङ्गा गण्डदूर्वयोः अथ पुष्पफला
नील्यां पुंसि ताल कपित्थयोः कूष्माण्डे तु द्वयोः॰ पोटगलः काशे नले पुमान् अथो वक्र
फला नीपे नामलध्वां तु योषिति काकमाच्यामयोः स्त्री च विज्ञेयं कटुकाफले ॥ ॥

इति॥ अंबुपिप्पली जलपिप्पली॥ काकाङ्का काकजंघा। गण्डदूर्वा गण्डिनी अथ पुष्पफलेति॰ नी
लीनीलिनी॥ तालस्तलः॥ कपित्थो दधित्थः॥ अमरमालायां पवर्गतृतीयमध्योपी नीरामाम्र ९३
माः॥ कूष्माण्डः कुसुमफलं॥ पोटगल इति॰ काशश्चामपुष्पः॥ नलो नडः॥ अथो वक्रफल इति॰ नी
पो धूलीकदंबः॥ मलयूः काष्ठोदुम्बरिका॥ योषधोपि॥ काकमाची काकाङ्का॥ कटुकाफलं कंकोलम्॥

महाबलमिति॰सीसकं नागं ॥ भारद्वाजी महासहा ॥ महाफलेति॰ कूष्मांडीपुष्पफललता ॥ चो
चं नालिकेरफलं बिल्वं श्रीफलः ॥ मुक्ताफलमिति॰ कर्पूरं हिमबालुका ॥ मौक्तिकमुक्ताफलं ॥
लवलीफलश्यामलं ॥ यवफल इति॰ मांसिका जटामांसी ॥ कुटजं इन्द्रयवः ॥ त्वचिसारो वंशः ॥
अथरक्तफलेति॰ बिंबी तुंडिकेरी वटः वकुपात् ॥ वृश्चिकालीति॰ मेषशृंगी अजशृंगी ॥ अज

भि ३

महाबलं सीसके स्याद्भारद्वाज्यां महाबला महाफलानु कूष्मांड्यांपुंल्लिंगः श्रीचबिल्वयोः मुक्ताफ
लंतु कर्पूरमौक्तिकेलवलीफले यवफलो मांसिकायां कुटजत्वचिसारयोः अथरक्तफलाबिम्ब्यांव
टे रक्तफलः पुमान् वृश्चिकाली मेषशृंग्यां वर्षाभूर्हिदिचविश्रियाम् समष्ठिलस्तोयमार्गे गंडीरेतुस
मष्ठिला सदाफलो नीलिकेरे माल्लूरे जन्तुमत्फले सोमवल्ल्यमृता ब्राह्मीचक्रांका वाकुचीत्वच

शृंगी मेषशृंगी सर्पदंष्ट्रा च वार्त्तिका ॥ द्वितीयादक्षिणावर्त्ता वृश्चिकाली विषाणिकेति धन्वंतरिः ॥ व
र्षाभूर्भित्पुनर्नवाभेदः ॥ समष्ठिल इति॰ तोयमार्गे जिलमयूरकः ॥ गंडीरो गंड दूर्वा सदाफल इति॰
नालिकेरघृतनेत्रः ॥ माल्लूरः श्रीफलो बिल्व इतिहलायुधः ॥ जंतुमत्फल उदुंबरः ॥ उदुंबरे गंधफले
नालिकेरे सदाफल इत्तिलोचनः ॥ सोमवल्लीति॰ अमृता गुडूची ॥ ब्राह्मी स्मारिणी ॥ चक्रांका कु

शिवप्र०
९४

अथसौवर्चलमिति० स्वर्जिक्षारः सर्जिकाक्षारः॥ सवर्चलंतरं सुगंधिलवणं॥ हरितालीति० दूर्वाहरिता॥ का
शोदीर्घपत्रः॥ तालंनटमंडनं॥ लयम्॥ अंगारवल्लीति० शार्ङ्गेष्टावल्ली करंजः॥ भार्गी कर्कशः॥ अंगारवल्ली
वालेयशाकः वर्बरवर्द्धकाइत्यमरः॥ गर्दभशाकोप्यत्रैव॥ ब्रह्मनेटीतिलोकख्याता॥ ज्वालामुखी अग्निज्वा
ला॥ अगियाइतिलोके॥ जघनेफलेति० मलयूः काष्ठोदुंबरिका॥ पनसः कंटकिफलः॥ श्लेष्मातकसदृक्पत्रः

अथसौवर्चलंस्वर्जिक्षारे चलवणान्तरे हरितालीतुदूर्वायां काशेतालेतुनद्ध्योः लयम् अङ्गारव
ल्लीशार्ङ्गेष्टभार्गीज्वालामुखीषुच जघनेफलामलयूं स्त्रीपनसेजघनेफलः लवटः क्रूरपाकफलः
पुंसिस्त्रियांचकरमर्दके क्रूरपाकफलालुम्बीखर्जूरीवाकुचीष्वपि रसायनफलाधात्रीमाचिकारु
ष्करेषुच लान्ताः वद्धि स्वचष्ठिक्लारान्जिकयोर्जीवरस्तुमधुरप्रिये महानिंबेपिजीवास्यात् जीवंती
वचयोरपि दार्वीदारुहरिद्रायांगोजिव्हायामपिस्त्रियाम्॥

(एस्याल्कं टकिफलस्तया। पनसश्चा ... यफल
दुतिकेयदेवः॥ लवटः॥ क्रूरपाकफलइति० करमर्दकः क्रूरः॥ तुंबस्त्वालूः॥ खर्जूरीदुरारोहा॥ वाकुचीसो
मराजी॥ रसायफलेति० धात्रीआमलकी॥ माचिकाकाकमाची॥ अरुष्करो भल्लातः॥ लान्ताः॥ वद्धि॥ स्व
वरति० छिक्काक्षुत्करी॥ राजिकाआसुरी॥ जीवरति० मधुरप्रियोजीवरः॥ महानिंबो द्रेक्का॥ जीवन्तीजीव
नीया॥ वचाहैमवती॥ दार्व्वीति० दारुहरिद्रापचंपचा॥ गोजिव्हाधेनुजिव्हिका॥ भूलग्नाक्षीरिणीदीर्घ ९४

श्रुतिरिहलिनीसुमंचक्रवत्सीतमिति॥

देवीति॰ कुमारीकासहा॥स्पृक्का कुटिला॥जायंतीवत्सामोटा॥तेजिनीतेजोह्वा॥विद्धकर्णीकुचेलिका॥एवे
वीत्रिसारदेवीविद्धकर्णीकुचेलिकेतिधर्मिष्ठः॥पीलुपर्णीमूर्वा॥मूर्वादिवीमधुरसामोरटातेजिनीस्रवा॥म
धूलिकामधुश्रेणीगोकर्णीपीलुपर्ण्यपीत्यमरः॥वन्ध्याकर्कोटकीमनोज्ञा॥धवइति॰भरोद्रुहःशकटाख्य
॥धूर्तःकनकाह्वयः॥ध्रुवइति॰ शंखःकंबुः॥वटःवटपत्र॥मूर्वामधुरसा॥शालिपर्णीस्थिरा॥प्लवइ
ति॰प्लक्षः गर्दभांडः॥शिलारससतुरुष्कः॥विकंकतःस्रुवतरुः॥वृक्षाम्लंतितिडीकं॥भेलोभल्लातकः॥

देवीकुमारिकास्पृक्काजयन्तीतेजनीषु च विद्धकर्णीपीलुपर्णीवन्ध्याकर्कोटकीष्वपि धवोभरोद्
हे धूर्ते ध्रुवः शङ्खे वटे पि च ध्रुवा मूर्वाशालिपर्ण्योः प्लवः प्लक्षे शिलारसे विकङ्कते च वृक्षाम्ले भेलके
कुलके पि च कैवर्तीमुस्तके गन्धतैले पि स्यान्नपुंसकं मद्वीकाक्षपतिविषयार्यचोमस्त्रप्रियरङ्गजे ल
ज्वालकेकरञ्जेपि चविश्वाविश्वं चनागरे स्त्रीवं गन्धरसेचोपविषाशङ्खाह्वयोः स्त्रियाम्॥

कुलकंपटोलं॥कैवर्तीमुस्तकं॥प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि चेति॰इयंविमुलकनाम्नाप्रसिद्ध
कमुस्ताकृतिरितिभावमिश्रः॥गंधतैलंरामकर्पूरास्त्रं॥मद्वीति॰द्राक्षाहारहूरा॥अतिविषाशुक्ल
कंदा॥यवइति॰अश्वप्रियोयवान्नं॥रंङ्गयवरंङ्गयवः॥मैलद्वेति॰अलकंवस्त्ररंजनंकरंजःकरञ्जः॥
विश्वेति॰नागरंशुंठी॥गंधरसोबोलः॥उपविषाविषा॥शंखाह्वाचोरपुष्पी॥शंखिनीनाकुली
विश्वाचोरपुष्पीसुकेशिनीतिवैद्यदेवः॥ ॥ ॥

शिव इति० पुरो गुग्गुलुः॥ पुंडरीकं कालं॥ बकुलो मधुदोहदः॥ शिविः सिंहो मृदु पुष्पः कण्टकः कुमुकु
रः शिव इति धर्म्मिष्ठः॥ सैंधवं माणिमंथं॥ कुंभी भद्रवती॥ महाकुंभी च कुंभीका भद्रा भद्रवती शिवेति
भावमिश्रः॥ अभया हरीतकी धात्री आमलकी॥ भूधात्री भूम्यामलकी॥ शमी शक्तुफला॥ शिविरिति०
भूर्जे लिखनपत्रः॥ बकुलो मधुदोहदः॥ स्वाद्वीति० श्रेणी खर्जूरी॥ रसाला शिखरिणी॥ अथ स्तुवेति०

शिवः पुरे पुण्डरीके बकुले सैंधवे शिवम्‌ शिवा कुम्भ्यभया धात्री भूमिधात्री शमीषु च शि
विर्भूर्जे च बकुले स्वाद्वी श्रेणी रसालयोः अथ स्तुवा स्याच्छ्यत्रकं मूर्वा धूली कदम्बयोः वत्रि
असीवम् अम्लवलो न स्त्री पुंसि घनच्छदे कारवी रामठी घोषा जमोदा कृष्णजीरके कितवश्चोर
१९ रके धूर्त्ते॥ ॥

शल्लकी गजभक्ष्या॥ मूर्वी मधुरसा॥ मुर्वति बध्नाति० मुर्व बंधने॥
अचू दीर्घत्वं टाप्‌० मूर्वा॥ ङीषि मूर्वीति न्यासः॥ धूली कदंबो नीपः॥ वत्रि॥ असीवमिति० अम्लि
लवणं वसिरं॥ असीवं वसिरो॥ शिग्रोनाऽमन्त्रे पुनरन्यवदिति मेदिनी॥ असीवो वसिरे पुमानि
ति लोचनः॥ घनच्छदः शिग्रुः॥ शोभांजने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः इत्यमरः॥ दीर्घादि
रपीति मुकुटः॥ कारवीत्ति० रामठी लवपत्री॥ घोषा मधुरिका॥ अजमोदा मोदा॥ कृष्णजीरकः का
लाजाजी॥ कितव इति० चोरको गणहासकः॥ ग्रंथिपर्णो ९५

कैरवमिति॰ कुमुदं कुमुदं॥ सितोत्पलं गर्दभकं चंद्रेष्टं कैरवं कुमुदं। कुमुदं चेति केयदेवः॥ रात्रिविकासि॥ अं
बुजं पंकजं। पंकेरुहं श्वेतपद्मसरोजं बुजपंकजं॥ कैरवं चाम्बुजं मंभोजं नलिनं भद्रं कुहमिति केयदेवः। तच्च दि
नविकासि॥ घनतरघनवृन्दच्छादिते व्योम्नि लोके सवितुरथ सुधांशोः संकथैव व्यरंसीत्॥ दिवसरजनिभेदं म
दवाताः शशंसुः कमलकुमुदगंधानाहरंतः क्रमेणेति सप्तम॥ पदवीति॰ सहदेवा महाबला॥ नागवल्ला तांबूल
की॥ माधवीति॰ कुंभीपाटला॥ नेपाली नवमालिका॥ अतिमुक्तो भ्रमरोत्सवः॥ वीरां दृत्यागंधकुटी माधवी गं
धमादनीति त्रिकांडशेषः॥ क्षौद्रशर्करा मधुशर्करा॥ जरणो जाजी॥ आम्रश्चूतः॥ अश्वत्थो वटः॥ सि

कैरवं कुमुदे स्त्र्यब्जे पदवी सहदेवायां नागवल्ल्यां च माधवी कुसुमाम् नेपाल्यामतिमुक्ते वीरायां क्षौद्र
शर्करायां च स्त्री वंजरणो यात्म्र अश्वत्थे सिक्थे च किंशुके पुंसि शताख्या मधुसंभूतशर्करा जातियोत्रि
षु शच्यां कनुवचा वंकम्बुमालिन्या दधिघ्न ह्योः सारिवा गोपकन्यायां सारिवः शालिभिद्यपि सुषवी
कारवेल्लेस्यात् जीरके कृष्णजीरके॥ ॥ सक्थं मयलं॥ किंशुकः पलाशः॥ शताह्वेति॰ मधुसंभूतशर्करा मधुश
र्करा॥ जाती मालती॥ पोत्री वाराही कंदः॥ शच्याह्वेति॰ वचा हेमवती॥ कम्बुमालिनी शंखपुष्पी॥ दधिश्री घन
म्॥ सारिवेति॰ गोपकन्या गोपालिका॥ शालिभित् प्रमोदो गोरसा रिवाषिति सिद्धमंत्रप्रकाशः॥ सुषवीति॰
कारवेल्लः कठिल्लः। जीरके जाजी। कृष्णजीरकः कालाजाजी॥ सुषवीदं समूर्द्धन्यवनीतिस्वामी॥ नान्तव

वच॥धामार्गव इति० अपामार्गः खरमंजरी॥ घोषकः कोशातकी॥ अधामार्गवइति स्वामी॥ अधामार्गो ऽपामार्गः कोशातकी चेति द्यर्थे धन्वंतरिः॥ मरू इति० कर्प्पास आच्छादनफलः॥ कर्पासीति च॥ खदिरो दन्तधावनः॥ यवासो यासः॥ मधुस्रवेति० धवश्रेणी मूर्वा॥ जीवा जीवन्ती॥ हंसपदी हंसपादीरक्त पादी मधुस्रवेति समानार्थाः॥ मधुयष्टी जीतकं॥ वारिभवइति० नखो व्याघ्रनखः॥ शंखो वारिचरः॥ शैवलः शैवालः॥ शीतशिवमिति० शैलेयः शिलापुष्पं॥ सिंधु सैंधवं॥ मिसिः शतपुष्पा॥ सहदे

वच धामार्गवस्तु पुंसि स्यादपामार्गे च घोषके मरू— — —कर्प्पास खदिरे च यवासके मधु स्रवा धवश्रेणी जीवा हंसपदी षु च मधुयष्ट्यां वारिभवो नखे शङ्खे च शैवले शीतशिवं शैलेये सिंधुनि मिस्यां तु शीतशिवः सहदेवी सर्पाक्ष्यां सहदेवा सारिवा वलयोः वयन् वारिसं भवमंभोजे ऽम्भीखलेतु शिखरो पि च वान्ताः शष्ठि कुशं जले ऽस्त्रियां दर्भे निशादावीहरिद्रयोः॥

वीति० सर्पाक्षी पदवी॥ यन्नता शिरो वहाप्रभावात्कुरं हंति॥ सहदेवा इति च॥ पदवी सहदेवायां नागवला यामिति हृदयदीपकः॥ सारिवा गोपी॥ वला त्रपीतपुष्पाकंकतिका॥ अन्ये वला नीलपुष्पा माक्रूः॥ लोचनस्तु पुंस्याहु॥ सहदेवो वला दंडोत्पलयोः सारिवौषधाविति॥ वयम्॥ वारिसंभवमिति० अंभो जं कमलं॥ अम्भीखंउ चंदनं॥ शिखरं पक्वदाडिमसंकाशं माणिक्यं शिखरं विदुरिति०॥ वान्ताः॥ शष्ठि कुशमिति० जलमंबु॥ दर्भः कुशः॥ ॥ ९६

पांशुरिति॰रजोधूलि॥सस्यार्थेचिरसंचितगोमयमितिस्पष्टम्॥तालव्या अपिदन्त्याश्चशंवश्शूक
पांशवः॥कलशःशंवलंचैवजिह्वायांरशनातथेतिद्विरूपेषुविश्वः॥शान्त्रि॥कपिशेति॰अतिमुक्तो
माधवीत्रिमिपिंडितःसिक्थः॥कर्कशइति॰इक्षुभित्काष्ठेक्षुः॥काशमर्दः॥कासघ्नः॥कासघ्नःकर्क
शोक्षेयःसूषान्याकासमर्द्दिकेतिवैद्यदेवः॥कसोदीतिलोके॥कंपिल्लोरक्तचूर्णः॥पिप्पलम्बलद
लः॥दुस्पर्शेति॰स्वयंगुप्ताकपिकच्छूः॥कंटालीकंटकारिका॥यवासकोयासः॥पलाशइति॰

पांशुरजसिसस्यार्थेचिरसंचितगोमये शान्त्रि॰कपिशात्वतिमुक्तेपिकपिशःक्रिमिपिंडिते
कर्कशस्त्विक्षुभित्काशमर्द्दकाम्पिल्लपिप्पले॥दुस्पर्शानुस्वयंगुप्ताकण्टार्योर्यवासके॥पला
शःकिंशुकेशक्र्यांभूकेशःशीवलेवटे॥लोमशानुजरामांसीकाकजंघावलाभिदि॥आत्म
गुप्ताहैमवतीमहामेदामलीमसे शान्ताः अक्षस्संसोवर्चलेनुत्थेनारुद्राक्षेविभीतके रूक्ष
स्तुभल्लुकेदीर्घवृन्तेचकृतवेधने काशीलुवरिकाग्रन्थोः॥ ॥किंशुकोब्रह्मवृक्षः॥शटीक

र्चूरः॥भूकेशइति॰शीवलःशैवालः॥वटःवकुपात्॥लोमशेति॰जरामांसीभूतजटा॥काकजंघा
नदीकांता॥वलाभिदतिवल्ला॥आत्मगुप्ताकपिकच्छूः॥हैमवतीवचा॥महामेदामलिच्छिद्रा॥मली
मसंकासीसं॥शान्ताः॥षड्॥अक्षमिति॰सोवर्चलंस्यात्तुत्थकमक्षंपाकंचतन्मतमितिनिघंटुः॥
तुत्थममृतासंगं॥रुद्राक्षःशिवप्रियः॥विभीतकःकर्षफलः॥रूक्षइति॰भल्लुकेश्योनाकेरूक्षइतित्रि॥ ॥

भावप्र॰ घोषइति॰ कोषातकीमित्र॥ धामार्गवो घोषकः स्यादित्यमरः॥ मिसिः शतपुष्पा॥ घोषामधुरिकामिसिः॥
९७ कर्कोटी॰ कर्कोटी च करंवश्च घोषा लोमसपत्रिकेति धन्वंतरिः॥ तुषइति॰ धान्यत्वक् स्पष्टं॥ अक्षः कर्षफ
लः॥ धान्यत्वचि तुषः पुंसि विभीतकतरावपीति मूर्द्धन्यांतरुद्रः॥ प्लक्षइति॰ पर्कटी जटी॥ प्लक्षो जटी प
र्कटी स्यादित्यमरः॥ विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादप इति शाश्वतः॥ पाकरिरिति लोके॥ग

घोषः कोषातकीमिदि घोषामिस्यां च कर्कोटग्रां तु षो धान्यत्वगक्षयोः प्लक्षस्तु पर्कटी गर्द्दभा
ण्डयोः कुञ्जराशने विषं जले ऽस्त्रियां क्ष्वेडे स्त्रियां माद्र्यां रसः स्त्रियाम् अश्वा सिंह्याम् ईषा शृङ्गी
लता युग्मा जया सु च॥ ॥

र्द्दभाण्डः कुंजराशनः पिप्पलः॥ विषमिति॰ जलं पानीयं क्ष्वेडो ऽमृतं॥ माद्री अतिविषा॥ रसइति॰ श्रीः सरल
द्रवः पीपिष्टोदधिक्षीर घृताद्य इति रभसः॥ श्रीर्लक्ष्मीर्भारती शोभा प्रभासु सरलद्रवइति लोचनः॥
रसः स्याद्रसके धर्मे सौरभेये च शुक्र ले रति रभसः॥ अश्वा अश्वगंधा॥ सिंही वासकः॥ शृंगी कर्कटशृं ९७
गी॥ लता ज्योतिष्मती युग्मा कपिकच्छुः॥ जया द्रवन्ती॥

षत्रि॥कुल्माषमिति॰कांजिकमवंतिसोमं॥अर्द्धस्विन्नधान्यंयवादि॥यवोहरिप्रियः।चलोहरिमंथः॥पेयूष
मिति॰पीयूषंच।पियूषोभिनवंपयइतिहेमचंद्रः॥आसप्ताहान्तु पेयूषंततोमोरणेइत्तिवेजयंती॥अमृतंसुधा
॥पीयूषममृतंसुधेत्यमरः॥शिरीषइति॰मृदुपुष्पोभंडीरः॥शिरीषोमृदुपुष्पश्चभंडीरः शंखिनीफलइतिध
न्वंतरिः॥कृष्णपाकफलः करमर्दः॥मकरंदःकरमर्दःशिरीषोमृदुपुष्पकइतिशुभांकः॥षच॥अलंबुषइति॰छ
र्द्दनोनिंबः॥मुंडीरंमुंडीरवरात्वक् अलंबुषाखरात्वक्कतथामेदोगलामतेति॥लज्जाल्वुभेदइतिभावमिश्रः॥

षत्रि कुल्माषंकांजिकेनार्द्धस्विन्नधान्ययवेचले पेयूषमपिपीयूषंनवेक्षीरेपिचामृते शिरीषोमृदु
पुष्पेचकृष्णपाकफलेपिच षच अलम्बुषश्छर्द्दनेस्त्रीमुण्डीर्यांचखरत्वचि ऋषभाक्षीन्द्रवारुण्यां
मृषभाक्षस्तुमुस्तके कालमेषीसमङ्गायांवाकुच्यांत्रिवृताभिदि देववृक्षःपुरेपर्णेमन्दारादैस्नु
चाद्रुमे नन्दीवृक्षस्तुकाश्मर्यांकुवेरेचप्ररोहिणि॥

॥ऋषभाक्षीति॰इंद्रवारुणीइंद्रास्ती॥मु
स्तकंमुस्ता॥कालमेषीति॰समङ्गामंजिष्ठा॥वाकुची॰कालमेषीकृष्णफलावाकुचीपूतिफल्यपीत्यमरः
॥त्रिवृताभित्काला॥देववृक्षइति॰पुरोगुग्गुलः॥पर्णःसप्तपर्णः॥मंदारादिः॥पंचैतेदेवतरवो
मंदारःपारिजातकः॥संतानःकल्पवृक्षश्चपुंसिवाहरिचंदनमित्यमरः॥स्नुचोद्रुमोवृक्षकंटका
रिका॥नन्दीवृक्षइति॰काश्मरीगंभारी॥कुवेरस्तुणिः॥प्ररोहीनदीवृक्षोश्वत्थभेदःप्ररोहीगजपा
दपइतिभावमिश्रः॥अश्वत्थभेदोधोमुख॥पत्रशाखः॥वस्त्रियापीपलइतिलोके॥ ॥

शिवप्र० ९८

पलङ्कषेति० रसा रास्ना॥ मुंडी मुंडीरी॥ लाक्षाजतु॥ पुरो गुग्गुलुः॥ क्षुरो गोक्षुरः॥ किंशुकः पलाशः॥ वीरवृक्ष

इति० भल्लातकोरुष्करः॥ अर्जुनः ककुभः॥ ककुभशब्दवाच्यः॥ भूतवृक्षइति० शाखोटः पीतफलको भूतावा

सः खरच्छदइतिभावमिश्रः॥ सहोडाइतिलोके ख्यातः॥ श्योनाको रलुः॥ विभीतकोऽक्षः॥ राजवृक्षइति०॥

शंपाकआरग्वधः॥ पियालो मुनिप्रियः॥ क्षत्रियो राजादनं॥ प्लवो गर्दभांडः॥ धान्त्ताः॥ सद्धि॥ वसुरिति० वृद्धि

योग्यं॥ शोधनी श्रावली वसुः॥ योग्यमितिकेयदेवः॥ वुकः शिवमल्ली॥ मांसीति० कंकोली वाढपत्रा वल्ली॥

पलङ्कषा रसा मुंडी लाक्षा स्वयपुरे क्षुरे किंशुके च पुमान् वीरवृक्षो भल्लातकेऽर्जुने भूतवृक्षस्तु शाखो

टे श्योनाके च विभीतके राजवृक्षस्तु शम्याके पियाले क्षत्रिये प्लवे धान्त्ताः सद्धि वसुर्वृद्धौ वुकमां

सीकङ्कोलीजटयोः स्त्रियाम् मिसिः स्त्री मधुरा मांस्योः शतपुष्पाजमोदयोः म्लसा काक्षी श्रे

ष्ठमद्दो रसः सूते विषे वले स्त्री रास्ना शल्लकी पाठा द्राक्षा मूर्वा मुदीषु च॥

((यस्याः फलानि कंकोला

नि॥ जटाजरामांसी॥ मिसिरिति० मधुरा मेथिका॥ मांसी जरामांसी॥ शतपुष्पा शताह्व॥ अजमोदा यवा

नी भेदः॥ वह्निर्मार्जनी॥ स्यान्मांस्यां शतपुष्पायां मधुरायां मिसिः॥ स्त्री मधुरामांस्योः शतपुष्पाजमोदयो

रिति मेदिनी सोमनंदी तु मिशी मिशिरितितालव्यांते आह॥ म्लसेति० काक्षा तुवरी॥ श्रेष्ठमृत मरसा॥ रसइ ९८

ति० सूतं पारदः॥ विषं काकोलः॥ वलं वोलः॥ रास्ना सुरभिः॥ शल्लकी गजभक्ष्या॥ पाठां वष्टा॥ विद्धक

र्णी स्थापनी श्रेयसी रसेस्समरः॥ द्राक्षा मद्वीका॥ मूर्वा मधुरसा देवीरसा मधुस्रवतथेति हृदयदीप

[illegible]

सत्रि॥कलसीति॰पृश्निपर्णीगुहा॥दाडिमीकरकः॥लेख्यपत्रोभूर्जः॥पयइति॰क्षीरंदुग्धं॥नीरमुदकं॥रज
इति॰रेणुःपर्प्पटः॥परागःसुमनोरजः॥रजोनापिरजःसममितिद्विरूपेषुविश्वः॥वायसइति॰वृकधू
पःश्रीवासः॥अगुरुद्रुमःजोंगकं॥काकोदुंबरिकामलयूः॥काकमाचीध्वांक्षमाची॥श्रीवाससरलाख्य
वःश्रीवेष्टोवृकधूपकइति॥पंकजंकमलं॥अथश्रेयसीति॰रास्नारसा॥रास्नायुक्तारसारस्याश्रे
यसीरसनारसेतिनिघंटुः॥करिपिप्पली॥गजपिप्पली॥अभयाहरीतकी॥वचाहेमवती॥सुरसइ

सत्रि॥कलसीपृश्निपर्ण्योस्याद्दाडिमीलेख्यपत्रयोः पयःक्षीरेचनीरेचरजोरेणुपरागयोः वाय
सोवृकधूपेचपुंसिस्यादगुरुद्रुमे काकोदुम्बरिकायांतुकाकमाच्यांचवायसी श्रीवासःसरलाख्या
वेपङ्कजेचाथिश्रेयसी॥रास्नायांकरिपिप्पल्यांमभयावचयोरपि सुरसस्तुद्वयोरर्ज्जेतुलसीरास्ना
योःस्त्रियाम् सच अथोघनरसःपीलुपर्ण्यांचक्षीरमोरटे॥हिमोपलेमेघपुष्पेदक्षिणावर्त्तपारदे॥

ति॰अर्ज्जःपर्णासः॥सुरसंतुत्रिषुस्वादौपर्णासेननपुंसकमिति॰तुलसीकृष्णा॥रास्नासुरभिः॥सच॥अ
थोघनरसइति॰पीलुपर्णीमूर्वा॥मूर्वामधुरसादेवीपीलुपर्णीमधुस्रवेतिधर्म्मिष्ठः॥क्षीरमोरटोमूर्वाभि
दः॥घनमूलोपरःक्षीरमोरटोकोटपुष्पकइतिकेयदेवः॥हिमोपलःकरकः॥शीताम्भःशीतलरजोघनसा
रोहिमोपलइतिकेयदेवः॥मेघपुष्पंआपः॥आपस्तोयंघनरसपयःपुष्करंमेघपुष्पंकंपानीयंसलि
लमुदकंवारिवाःशंबरंचेतिहलायुधः॥दक्षिणावर्त्तपारदःसिद्धरसः॥भवेद्घनरसःसांद्रेनिर्यासेमोरट

दीर्घायुरिति० ताम्रपुष्पा शाल्मली॥ चिरजीवकः जीवदः॥ मधुरसेति० गुडाद्राक्षा॥ मूर्वा देवी॥ गं
भारीक ट्फला॥ क्षीरिणी दुग्धिका॥ महारसइति० दीर्घपत्र इक्षुः॥ खर्जूरी गुरारोहः॥ केसरु
वृषपर्णी॥ सूतः पारदः॥ माली मसमिति० पुष्पकासीसं भूमिजो धातुः॥ सर्वतैजसं लोहं॥ लोहस्तु
शस्त्रे लोहं तु जोंगके सर्वतैजसे इति विलोचनः॥ सुमना इति० करंजः पूतीकरंजः सुमनास्त
था वल्लहनाशन इतीन्दुः॥ जाती मालती॥ गायत्री रिम रोध पुंड्र सुमनोजं वृसमंगा वृष

दीर्घायुस्ताम्रपुष्पायां पुंसि स्याच्चिरजीवके मधुरसा गुडा मूर्वा गम्भारी क्षीरिणी युच महा
रसो दीर्घपत्रे खर्जूरे पि केसरुणि सूते मलीमसं पुष्पकासीसे सर्वतैजसे सुमना नाकरंजे
९९ स्त्री जात्यां भूम्नि स्त्रियां सुमेसन्नाः

श्रेष्ठायपह्निपर्व्वपचान्यतमलमिइति वोपदेवः॥ टावंतोपि॥
सुमनायाश्च पत्रेण पटोला रिष्टयोस्तथेति सुश्रुतवचनात्॥ सुमना मालती जाती जातिरिसम
रश्च॥ विकसितसुमनासुमेषु सत्सु प्रवल मरंदभरेण तुंदिलेषु॥ मधुकर करमर्द्दकद्रुमाणां कि
मिति मुधा कुसुमेषु चभ्रमी खिलिगोस्वामिगोपेश्वराणाम्॥ सुमं कुसुमं म्॥ भूम्नि स्त्रियां सुमनस ९९
इति रत्नकोषः॥ सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोरिति सोतेमेदिन्यादिदर्शनादेकत्वमपि॥ पु
ष्पं सुमनाः कुसुममिति नाममालादिदर्शनाच्च॥ सुमनाः प्राज्ञदेवयोः॥ जात्यां पुष्पे इति हैमः सोतवर्गो॥
सान्ताः॥ ॥

हृद्धि॥ व्रीहिरिति॰ सामान्यधान्यं धान्यमात्रं॥ आशुव्रीहिः पाटलः॥ पाटलः पाटलापुष्पाभो व्रीहिरितिसि
द्धमंत्रप्रकाशः॥ रुहेति॰ रोहिणी कटुरोहिणी॥ दूर्वा हरिता॥ लोहमिति॰ जोंगकं अगुरुप्रवरं लोहं राजार्हं
जोंगकंत्वधिरिति भावमिश्रः लोहस्तु शस्त्रे लोहं तु जोंगके सर्वतैजसइति लोचनः॥ सर्वतैजसं सुवर्णरज
तं ताम्रं रीतिः कांस्यं तथा त्रपु॥ सीसकालापसं चैव मष्टौ लोहानि च क्रमात् इति। सहेति॰ सहदेवा बला

हृद्धि व्रीहिः सामान्यधान्ये स्यादाशुव्रीहौ पुमान् रुहा रोहिणीदूर्वयो र्लोहं जोङ्गकेसर्वतैजसे
सहा तु सहदेवायां मुद्गपर्ण्यां नखेऽपि च कुमार्य्यां वनकर्प्पास्यां शतपत्र्यां वलाभिदि सिंहो बकु
ले सिंही बृहती द्वयन्तृषक काकली वङ्ग ॥

॥ भेदः॥ पीतपुष्पा कंकतिका॥ मुद्गपर्णी यथार्थैव शर
पुंखाभगुल्मकइति॥ नखो व्याघ्रनखः॥ कुमारी घृतकुमारी॥ वनकर्प्पासी चंदनवीजिका॥ वनक
र्प्पासिकायां तु सहा चंदनवीजिकेति भावमिश्रः॥ शतपत्री कुंकुमभेदः॥ वलाभिदिति वला॥ सिंह
इति॰ वकुलोमधुदोहदः॥ सिंहस्तु वकुलः समाविति सिंहः॥ बृहती द्वयं कंटकारी द्वयी॥ वृषको वास
कः॥ काकली कपर्दकजातिः॥ वङ्गं वार्त्ताकम्॥ ॥

शिवप्र० हस्ति॥किरिर्हीति० अश्वखुरः करभी॥मार्ग्ग आघाटः खरमंजरीत्ति समानार्थाः॥वराहइति० किटिर्वा
१०० राही कंदः॥मुस्ता च॥वैदेहीति० रोचना गोरोचना॥शौंडी पिप्पली॥सुवहेति० शल्लकी गजभक्ष्या च सु
वहा सुरसा रसेति भावमिश्रः॥रास्ना रसा॥शेफाली नीलपुष्पी च निर्गुंडी शेफाली सुवहचसेति भा
160

हस्ति किरि अश्वखुरे मार्गे वराहः करि मुस्तयोः वैदेही रोचना शौण्डोः सुवहा शल्लकी नुभे रा
स्ना शेफालिकागोधापद्येला पर्णिका सुच हच महासहा माषपर्ण्यम्लाने वक्रकल्के हा
न्ताः॥

वमिश्रः॥सभाल्लूइति ख्यातः॥गोधापदी तु सुवहा त्रिपदी हंसपद्यपीति कोषान्तरम्॥एलापर्णी
तु सुवहा रास्ना युक्तरसा च सेति॥हच॥महासहेति० माषपर्णी कांबोजिका॥माषपर्णी तु कांबोजी कृ १००
ष्णवृन्ता महासहेति धन्वन्तरिः॥अम्लानः कुमारिकाभेदः॥अम्लानस्तु महासहेत्यमरः॥वक्र
कल्कः कुब्जकः॥हान्ताः॥ ॥

शिवप्र० ग्रन्थार्थमुपसंहरति ॥ प्रचुरेत्यादि ० विज्ञाज्ञाताः ॥ प्रायः बाहुल्येन ॥ अशेषाभिधानेनेन्द्रादीनामपि
१०१ शक्तुमशक्यत्वात् ॥ उत्पलिनी कोषविशेषः ॥ तत्प्रभृतिषु तदादिषु ॥ तेनाभिधानचूडामण्यादीनामपि
ग्रहः ॥ ग्रन्थकृद्दात्मानं ख्यापयति ॥ नवग्रहेति ० हायनोऽस्त्री शरत्समाः इत्यमरः ॥ हालः शालवाहनपार्थि
वः ॥ हाला सुरायामिति हैमः ॥ चातुर्भुजिः ॥ अतद्गुणः ॥ पूर्वापुराम्नाय कृतां वचोभिः शिवप्रकाशो रचि

प्रचुरप्रयोगविज्ञाये शब्दास्त इह कीर्तिताः प्रायः ॥ दृष्टा अप्युत्पलिनीप्रभृतिषु चान्ये परिज्ञ
ज्ञाः ॥ १ ॥ नवग्रहतिथिप्रमिते हायने हालभूभुजः ॥ चक्रे चातुर्भुजिः कोषं शिवदत्तः शिवा
भिधम् ॥ २ ॥ ॥ इति कर्पूरीयचतुर्भुजात्मजशिवदत्तः कृतः शिवकोषः संपूर्णः ॥ ॥

तोयतोऽस्मिन् ॥ विधीयतां दोषविधौ समाधिर्ग्रन्थेन दोषः कुनरप्रणीते ॥ सततपरहितैकमानसा १०१
नां विमलधियां गुणिनाममत्सराणाम् ॥ विलसतु हृदये चिकित्सकानामिति शिवदत्तकृतः शिवप्र
काशः ॥ ॥ इति कर्पूरीयचतुर्भुजात्मजशिवदत्तकृतः शिवप्रकाशः संपूर्णः ॥ ॥ संवत् १९८०
चैत्रकृष्ण २ भौमवासरे ॥ ॥

शिवदत्तकृतशिवकोश

